कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

कविकुलगुरू कालिदास संस्कृत विश्वविद्यालय रामटेक

हस्तलिखित संग्रह

दाखल.क्र. m. 3066 विषय —

नाव गृहपरिशिष्टोक्त नवग्रहम्

लेखक/लिपीकार केशवसुसुनागनेशे

पृष्ठ 45 काळ शके-1784 पुर्ण/ अपुर्ण

M-3066

॥अथगृह्यपरिशिष्टोक्तग्रहमखप्रारंभः॥

श्रीगणेशायनमः ॥ अथगृह्यपरिशिष्टोक्तनवग्रहयज्ञः ॥ सचनि
१ त्यनैमित्तिककाम्यभेदेनत्रेधा ॥ अयनविषुवोपरागादिषुनित्यः ॥
गर्भाधानादिकर्मारंभेषुनैमित्तिकः ॥ विपदुपगमसंपदादिका
मनासुकाम्यः ॥ अत्रमूलान्याकरतोज्ञेयानि ॥ ग्रहरूपादिज्ञात्वा
कर्मकार्यं ॥ अन्यथाविफलं ॥ तदाहाश्वलायनाचार्यः ॥ रूपवर्णा
युधस्थानमंडलासनवाहनान् ॥ समित्कुंडोपहारांश्चपुष्परत्ना
नू तीरपि ॥ गायत्रीमूलमंत्रांश्चनाममंत्रांश्चकेवलान् ॥ अधित्र १
त्यधिदेवानांमंत्रांश्चर्ष्यादिसंयुतान् ॥ तत्तन्मूर्तीश्चजानीया
द्योभ्यर्चेन्नवग्रहान् ॥ अज्ञात्वैवपुमानिष्ट्वातत्फलंनैवविंदति ॥

उःखं चाप्नोति सुमहत्फलादिष्वाप्य विसुमानिति ॥ गायत्रीग्रहगा
यत्रीग्रेयोगो वक्ष्यते ॥ वर्णादयश्च ॥ मंडपकुंडादि च काम्ये यथोक्तं
कार्यं ॥ नित्यनैमित्तिकयोस्तु अनित्यं ॥ नित्यनैमित्तिकं कुंडत्वा सर्वम
न्यसमंडपमिति मात्स्योक्तेः ॥ कुंडे वा स्थंडिले पि वेति आचार्योक्ते
श्च ॥ मंडपलक्षणं हेमाद्रौ मत्स्यपुराणे ॥ गृहस्योत्तरपूर्वेण मंडपं
कारयेद्बुधः ॥ रुद्रायतनभूमौ वा चतुरस्रमुदक्प्लवं ॥ दशहस्ता
नथोष्टौ वा हस्तान्कुर्याद्विधानतः ॥ तस्य द्वाराणि चत्वारि कर्त्तव्या
नि विचक्षणैः ॥ कुंडं स्कंदपुराणे ॥ नवग्रहमखे कुंडं हस्तमात्रं समं
ततः ॥ चतुरस्रमधोहस्तं योनिवक्त्रं समेखलं ॥ चतुरंगुलविस्ता

ग्रामेखलातदूर्द्ध्वस्थिता ॥ मात्स्ये ॥ वितस्तिमात्रायोनिस्यात्षट्सप्तांगु
॥२॥ लविस्तृता ॥ कूर्मपृष्ठोन्नतामध्ये पार्श्वयोश्चांगुलोच्छ्रिता ॥ गजो
ष्ठसदृशीतद्वदायताछिद्रसंयुता ॥ मेखलोपरिसर्वत्र अश्वत्थदल
संनिभा ॥ गजोष्ठतुल्याश्वत्थदलतुल्या वेति विकल्पः ॥ साच योनिः
पश्चिमतःकार्या ॥ पश्चिममध्यभागेतुयोनिंकुर्याद्विधानतइति ग
र्गोक्तेः ॥ मात्स्ये ॥ मानहीनाधिकंकुंडमनेकभयदंभवेत् ॥ तस्याच्चो
त्तरपूर्वेतुस्थंडिलंहस्तमात्रकं ॥ त्रिवप्रंचतुरस्रंचवितस्त्युच्छ्राय ॥२॥
संमितं ॥ स्थंडिलंवेदिः ॥ वप्रामेखलाः ॥ द्व्यंगुलोच्छ्रितोवप्रःप्रथ
मःसमुदाहृतः ॥ अंगुलोच्छ्रायसंयुक्तंवप्रद्वयमथोपरि ॥ द्व्यंगुलस्त

त्र विस्तारः सर्वेषां कथितो बुधैरिति ॥ अन्यत्सर्वं चर्णदेवत्रानामादिम
योगे स्पष्टीभविष्यति ॥ ॥ अथ ग्रहयज्ञप्रयोगः ॥ यजमानः स्नात्वा नि
त्यकर्म निर्वर्त्य मौहूर्तिकोक्ते काले देवत्राकालौ संकीर्त्य अयनादिति
थ्यकालेषु संकल्पयेत् ॥ ग्रहानुकूल्यसिद्धिद्वारा श्रीपरमेश्वरप्री
त्यर्थं ग्रहयज्ञं करिष्य इति ॥ गर्भाधानादिनिमित्तेषु अमुककर्मक
र्तुमादौ आदित्यादिग्रहानुकूल्यसिद्धिद्वारा श्रीपरमेश्वरप्रीत्य
र्थं ग्रहयज्ञं करिष्य इति ॥ विपदपगमादिकामनायांतु अमुकका
मनासिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं ग्रहयज्ञं करिष्य इति ॥ ततः
संभारान्संभरेत् ॥ तत्र नित्यनैमित्तिकयोः प्रतिपदोक्तवस्तूनि त

दभावे अनुकल्परूपाणि वा यथाशक्ति संपादयेत्॥ काम्ये तु प्रतिनि
ध्यभावात्प्रतिपदोक्तवस्तून्येव॥ तत आचार्यादिवरणं॥ तत्र विधि
ज्ञं स्वशाखाविदं साचारमेकमस्मिन् ग्रहमखे त्वमाचार्यत्वं कुर्विति
पाणिना पाणिमुपस्पृश्य वृणुयात्॥ अन्यानार्त्विज्यं कुर्विति प्रत्ये
कं वृणुयात्॥ ते च होमानुसारेण चत्वारोऽष्टौ षोडश वा॥ ते च करि
ष्यामीत्युक्त्वा आचमेयुः॥ ततो यजमानस्तान्यथाशक्त्यर्चयेत्॥
तत आचार्यः कर्मसंकल्पपूर्वकं गृहादुत्तरत ऐशाने वाहृतायांचे
तुर्दिक्षु हस्तमात्रावरायां चतुस्त्रिद्व्यंगुलप्रमाणत्रिभूमिकायां
ग्रहवेद्यां शुक्लव्रीहितंदुलैः सकर्णिकमष्टदलमंबुजमुल्लिख्य

कर्णिकायां दलेषु च वर्तुलादिग्रहपीठानि तत्तद्वर्णकाक्षतैर्यथो
पपन्नैर्वा कुर्यात् ॥ तानीत्थं ॥ मध्ये रक्ताक्षतैर्वर्तुलं ॥ आग्नेयदलेषु
क्लाक्षतैश्चतुरस्रं ॥ दक्षिणदले रक्ताक्षतैस्त्रिकोणं ॥ ईशानदले
हरिताक्षतैर्बाणाकारं ॥ उत्तरदले हरिताक्षतैर्दीर्घचतुरस्रं ॥ पू
र्वदलेशु क्लाक्षतैः पंचकोणं ॥ पश्चिमदले कृष्णाक्षतैश्चापा
कारं ॥ नैर्ऋत्यदले कृष्णाक्षतैः शूर्पाकारं ॥ वायव्यदले चित्रा
क्षतैर्ध्वजाकारमिति ॥ ततउदीच्यां रंगवल्लिकारं जिनपद्मोप
मव्रण रिध्वतधान्यपीठेन वंमकालं तैजसं मृन्मयं वा गंधानुलिप्तम कं
लंकृतं शुभमभिषेककुंभं निधाय ॥ इमं मे गंगे इत्यस्य सिंधुः

४ क्षित्प्रय्यमेधोनदीस्तुतिर्जगती॥ जलपूरणेविनि०॥ ॐ इमंमेगंगे
यमुनेसरस्वतिशुतुद्रिस्तोमंसचतापरुष्ण्या॥ असिक्न्यामरुद्वृ
धेवितस्तयार्जीकीयेशृणुह्यासुषोमया॥ सूत्रेणवस्त्रसुगंधेन
नावेष्ट्य॥ हयगजवल्मीकह्रदगोष्ठराजद्वारचतुष्पथमृदः॥
उद्धृतासिवराहेणकृष्णेनशतबाहुना॥ मृत्तिकेहनमेपापंय
न्मयादुष्कृतंकृतमितिकुंभेनिक्षिप्य॥ रुचतिभीमइत्यस्यवै
श्वामित्रोरेणुःपवमानसोमोजगती॥ पंचत्वक्प्रक्षेपणेविनि ५
योगः॥ ॐ रुवतिभीमोवृषभस्तविष्ययाशृंगेशिशानोहरिणीवि
विचक्षणः॥ आयोनिंसोमःसुकृतंनिषीदतिगव्ययीत्वग्भवति

निर्णिगव्ययौ ॥ अनेनन्यग्रोधाश्वत्थप्लक्षजंबूचूतवृक्षत्वचः ॥
प्रवोयज्ञेष्वित्यस्यवसिष्ठोविश्वेदेवास्त्रिष्टुप् ॥ पल्लवप्रक्षेपणे
वि० ॐ प्रवोयज्ञेषुदेवयंतोअर्चंद्यावानमोभिःपृथिवीइषध्यै ॥
येषांब्रह्माण्यसमानिविप्राविष्वग्वियंतिवनिनोनशाखाः ॥ अने
नतेषांपल्लवान्निक्षिप्य ॥ आप्यायस्वसमेतुतइत्यस्यराहूगणो
गोतमःसोमोगायत्री ॥ गोक्षीरप्रक्षेपणेविनियोगः ॥ ॐ आप्या
यस्वसमेतुतेविश्वतःसोमवृष्ण्यं ॥ भवावाजस्यसंगथे ॥ अ
नेनगोक्षीरं ॥ दृधिक्राव्णइत्यस्यगोतमोवामदेवोदधिक्रावा
नुष्टुप् ॥ दधिप्रक्षेपणेवि० ॐ दृधिक्राव्णोअकारिषंजिष्णो।

रश्वस्यवाजिनः॥सुरभिनोमुखाकरत्प्रणआयूंषितारिषत्॥अ
नेनदधि॥शुक्रमसिज्योतिरसितेजोसि॥अनेनघृतं॥गंधद्वारे
सस्यानंदःश्रीरनुष्टुप्॥गोमयप्रक्षेपणेवि०ॐगंधद्वारांदुरा
धर्षांनित्यपुष्टांकरीषिणीं॥ईश्वरींसर्वभूतानांतामिहोपह्व
येश्रियं॥अनेनगोमयं॥गायत्र्यागाथिनोविश्वामित्रःसवितागा
यत्री॥गोमूत्रप्रक्षेपणेवि०ॐतत्सवितुर्वरेण्यंभर्गोदेवस्यधी
महि॥धियोयोनःप्रचोदयात्॥अनेनगोमूत्रंचनिक्षिप्य॥स
हिरत्नानीत्यस्यश्यावाश्वःसवितागायत्री॥नवरत्नप्रक्षेपणेवि०
ॐसहिरत्नानिदाशुषेसुवातिसविताभगः॥तंभागंचित्रमीमहे॥

अनेन नवरत्नानि ॥ या ओषधीरित्यस्याथर्वणो भिषगोषधयो
नुष्टुप् ॥ स्नातौषधप्रक्षेपणे वि० ॐ या ओषधीः पूर्वा जाता देवे
भ्यस्त्रियुगं पुरा ॥ मनैनु बभ्रूणामहं शतं धामानि सप्त च ॥ तदभा
वे दूर्वामूलानि तदभावे सर्ववर्णा ॥ गंधद्वारेत्यस्यानंदः श्रीर
नुष्टुप् ॥ गंधप्रक्षेपणे वि० ॐ गंधद्वारां दुरा० श्रियं ॥ अनेन गं
धं निक्षिप्य ॥ कांडात्कांडादित्यस्य याज्ञिक्यो देवता उपनिषदः
स्वयंभूर्दूर्वानुष्टुप् ॥ दूर्वाप्रक्षेपणे वि० ॐ कांडात्कांडात्प्ररो
हंती परुषः परुषः परि ॥ एवा नो दूर्वे प्रतनु सहस्रेण शतेन च ॥
अनेन दूर्वा निक्षिप्य ॥ सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ॥

६ आयांतु यजमानस्य दुरितक्षयकारकाः ॥ गंगे च यमुने चैव गो-
दावरि सरस्वति ॥ नर्मदे सिंधु कावेरि जलेस्मिन्सन्निधिं कुरु ॥
ॐ इमं मे गंगे यमुने० मया ॥ अनेन कुंभेतीर्थान्यावाहयेत् ॥
ततः कुंभमभिमंत्र्य जपेत् ॥ आपो हि ष्ठेति नवर्चस्य सूक्तस्यां-
बरीषः सिंधुद्वीप आपो गायत्री ॥ पंचमी वर्धमाना सप्तमी प्रति-
ष्ठांऽत्ये द्वे अनुष्टुभौ ॥ कलशाभिमंत्रणे विनि ॐ आपो हि
ष्ठा मयोभुवस्तानऽऊर्जे दधातन ॥ महे रणाय चक्षसे ॥
यो वः शिवतमो रसस्तस्य भाजयतेह नः ॥ उशतीरिव मातरः ६
॥ तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ ॥ आपो जनयथा

चनः ॥ शंनोदेवीरभिष्टयआपोभवंतुपीतये ॥ शंयोरभिस्रवंतु
नः ॥ ईशानावार्याणांक्षयंतीश्चर्षणीनां ॥ अपोयाचामिभेष
जं ॥ अप्सुमेसोमोऽअब्रवीदंतर्विश्वानिभेषजा ॥ अग्निंचवि
श्वशंभुवं ॥ आपःपृणीतभेषजंवरूथंतन्वेऽमम ॥ ज्योक्चसूर्यं
दृशे ॥ इदमापःप्रवहतयत्किंचदुरितंमयि ॥ यद्वाहमभिदु
द्रोहयद्वाशेपउतानृतं ॥ आपोअद्यान्वचारिषंरसेनसम
गस्महि ॥ पयस्वानग्नआगहितंमासंसृजवर्चसा ॥ नहि
तेक्षत्रमित्याद्येकविंशत्यर्चस्याजीगर्तिःशुनःशेपोवरुणाद्या
दशत्रिष्टुभः ॥ शिष्टागायत्र्यः ॥ कलशाभिमंत्रणेवि॰ ॐ नहि

गट॰

ऽ तेक्षत्रं नसहोनमन्युं वयश्चनामीपतयंत ऽ आपुः ॥ नेमा ऽ आपो॰
अनिमिषं चरंतीर्नयेवातस्यप्रमिनंत्यभ्वं ॥ अबुध्नेराजावरुणो
वनस्योर्ध्वं स्तूपं ददते पूतदक्षः ॥ नीचीनाः स्थुरुपरिबुध्न ऽ एषा
मस्मे अंतर्निहिताः केतवः स्युः ॥ उरुं हि राजा वरुणश्चकार सूर्या
य पंथामन्वेतवा ऽ उ ॥ अपदे पादा प्रतिधातवेकरुतापवक्ता हृदयावि
धश्चित् ॥ शतं ते राजन्भिषजः सहस्रमुर्वी गभीरा सुमतिष्टे
अस्तु ॥ बाधस्व दूरे निर्ऋतिं पराचैः कृतं चिदेनः प्रमुमुग्ध्यस्म ऽ
त् ॥ अमी य ऽ ऋक्षा निहितास ऽ उच्चा नक्तं ददृश्रे कुह चिद्दि
वेयुः ॥ अदब्धानि वरुणस्य व्रतानि विचाकशच्चंद्रमा नक्तमे

ति॥३॥तत्वायामिब्रह्मणावंदमानस्तदाशास्तेयजमानोहविर्भिः॥
अहेळमानोवरुणेहबोध्युरुशंसमानऽआयुःप्रमोषीः॥तदिन्न
क्तंतद्दिवामह्यमाहुस्तदयंकेतोहृदऽआविचष्टे॥शुनःशेपोय
मह्वद्गृभीतःसोऽअस्मान्राजावरुणोमुमोक्तु॥शुनःशेपोह्य
ह्वद्गृभीतस्त्रिष्वादित्यंद्रुपदेषुबद्धः॥अवैनंराजावरुणःसस
पा ज्याद्विद्वांऽअदब्धोविमुमोक्तुपाशान्॥अवतेहेळोवरुणनमो २
भिरवयज्ञेभिरीमहेहविर्भिः॥क्षयन्नस्मभ्यमसुरप्रचेताराज
न्नेनांसिशिश्रथःकृतानि॥उदुत्तमंवरुणपाशमस्मदवाधमं
विमध्यमंश्रथाय॥अथावयमादित्यव्रतेतवानागसोऽअदितये

स्याम ॥२॥ यच्चिद्धि ते विशो यथा प्र देव वरुण व्रतं ॥ मिनीमसि द्यवि
८ द्यवि ॥ मा नो वधाय हत्नवे जिहीळानस्य रीरधः ॥ मा हृणानस्य म
न्यवे ॥ वि मृळीकाय ते मनो रथीरश्वं न संदितं ॥ गीर्भिर्वरुण सीम
हि ॥ परा हि मे विमन्यवः पतन्ति वस्यऽइष्टये ॥ वयो न वसतीरुप ॥
कदा क्षत्रश्रियं नरमा वरुणं करामहे ॥ मृळीकायोरुचक्षसं ॥३॥ त
दित्समानमाशाते वेनंता न प्रयुच्छतः ॥ धृतव्रताय दाशुषे ॥ वेदा
यो वीनां पदमंतरिक्षेण पततां ॥ वेद नावः समुद्रियः ॥ वेद मासो ८
धृतव्रतो द्वादश प्रजावतः ॥ वेदायऽउपजायते ॥ वेद वातस्य वर्त
निमुरोर्ऋष्वस्य बृहतः ॥ वेदा येऽअध्यासते ॥ निषसाद धृतव्रतो

वरुणःपस्त्या३स्वा॥साम्राज्यायसुक्रतुः॥४॥अतोविश्वान्यद्भु
ताचिकित्वाँअभिपश्यति॥कृतानियाचकर्त्वा॥स्वादिष्ठयेतिदशा
र्चस्यसूक्तस्यमधुछंदाःपवमानसोमोगायत्री॥कलशाभिमंत्र
णेवि॰ॐस्वादिष्ठयामदिष्ठयापवस्वसोमधारया॥इंद्रायपात
वेसुतः॥रक्षोहाविश्वचर्षणिरभियोनिमयोहतं॥द्रुणासध
स्थमासदत्॥वरिवोधातमोभवमंहिष्ठोवृत्रहंतमः॥पर्षिरा
धोमघोनां॥अभ्यर्षमहानांदेवानांवीतिमंधसा॥अभिवाजमु
तश्रवः॥त्वामच्छाचरामसितदिदर्थंदिवेदिवे॥इंदोत्वेनआश
सः॥१॥पुनातितेपरिस्रुतंसोमंसूर्यस्यदुहिता॥वारेणशश्वतातनात

नो ॥ तमीमण्वीः समर्य आ गृभ्णंति योषणो दश ॥ स्वसारः पार्ये दिवि ॥
तमीं हिन्वंत्यग्रुवो धमंति बाकुरं दृतिं ॥ त्रिधातु वारणं मधु ॥ अ
भी३ममघ्न्या उत श्रीणंति धेनवः शिशुं ॥ सोममिंद्राय पातवे ॥ अ
स्येदिंद्रो मदेष्वा विश्वा वृत्राणि जिघ्नते ॥ शूरो मघा च मंहते ॥
२॥ अनेन सूक्तेन च तं कुंभमभिमंत्रयेत् ॥ यद्वा कलशाभि
मंत्रए अन्यं मंत्रविदं नियुंजीत ॥ ततः कर्मसंकल्पविधिवत्स्व
स्तिवाचनं कृत्वा ॥ ग्रहवेदिपद्मपीठेषु यथास्थानं यथामुखी
र्ग्रहमूर्तिमास्थापयित्वा दक्षिणवामपार्श्वयोरधिदेवताप्रत्य
धिदेवते तदभिमुख्यौ स्थापयेत् ॥ तदभावे पुष्पाक्षतादिषु वा

हयेत्॥ तत्रायं प्रकारः॥ व्यस्तसमस्तव्याहृतीनामत्रिभृगुभ
रद्वाजप्रजापतयऋषयः॥ अग्निवायुसूर्यप्रजापतयो देवताः॥
गायत्र्युष्णिगनुष्टुब्बृहत्यश्छंदांसि॥ सूर्यावाहने विनियोगः॥
ॐ भूरादित्यमावाहयामि॥ ॐ भुवरादित्यमावाहयामि॥ ॐ स्व
रादित्यमावाहयामि॥ ॐ भूर्भुवःस्वरादित्यमावाहयामि॥ आ
कृष्णेनेत्यस्य हिरण्यस्तूपऋषिः सविता देवता त्रिष्टुप्छंदः॥
सूर्यावाहने विनियोगः॥ ॐ आकृष्णेन रजसा वर्तमानो नि
वेशयन्नमृतं मर्त्यं च॥ हिरण्ययेन सविता रथेना देवो याति
भुवनानि पश्यन्॥ इति मंत्रमुच्चार्य भगवन्नादित्य ग्रहाधिपते काश्यप

गोत्र कलिंगदेशेश्वर जपापुष्पोपमांग स्तुते द्विभुज पद्माभयहस्त
१० सिंदूरवर्णांबर माल्यानुलेपनज्वलन्माणिक्यखचित सर्वांगाभरण
भास्कर तेजोनिधे त्रिलोकप्रकाशक त्रिदेवतामयमूर्ते नमस्ते सन्न
द्धारुणध्वजपाताकोपशोभितेन ससाऽश्वरथवाहनेन मेरुं प्रदक्षि
णीकुर्वन्नागच्छाग्निरुद्राभ्यां सह पद्मकर्णिकायां ताम्रप्रतिमां प्रा
ङ्मुखीं वर्तुले पीठेऽधितिष्ठ पूजार्थं त्वामावाहयामि ॥ तद्दक्षिणपा
र्श्वे ॥ ॐ भूरादित्याधिदेवमग्निमावाहयामि ॥ ॐ भुवरादित्याधि १०
देवमग्निमावा० ॐ स्वरादित्याधिदेवमग्निमा० ॐ भूर्भुवःस्वरा
दित्याधिदेवमग्निमा० अग्निंदूतमित्यस्य काण्वो मेधातिथिर्ऋषिः

अग्निर्देवता गायत्री छंदः ॥ अग्न्यावाहने वि० ॐ अग्निं दूतं वृणीमहे
होतारं विश्ववेदसं ॥ अस्य यज्ञस्य सुक्रतुं ॥ इमं मंत्रमुच्चार्य पिंगभ्रू
श्मश्रुकेशं पिंगाक्षं त्रिनयनं अरुणवर्णां गं छागस्थं साक्षसूत्रं सस्रा
र्चिषं शक्तिधरं वरदहस्तं हृदयमादित्याधिदेवमग्निमावाहयामि ॥
तद्वामपार्श्वे ॥ ॐ भूरादित्यमत्याधिदेवं रुद्रमा० ॐ भुवरादित्य
अ मत्याधिदेवं रुद्रमा० ॐ स्वरादित्यमत्याधिदेवं रुद्रमावाह० ॥ ॐ भू
र्भुवः स्वरादित्यमत्याधिदेवं रुद्रमा० त्र्यंबकमित्यस्य वसिष्ठऋषिः
त्र्यंबको देवता अनुष्टुप् छंदः ॥ रुद्रावाहने वि० ॐ त्र्यंबकं यजा
महे सुगंधिं पुष्टिवर्धनं ॥ उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृ

तीन्॥ इमं मंत्रमुच्चार्य त्रिलोचनोपेतं पंचवक्त्रं वृषारूढं कपालशूल
११ खट्वांगधारिणं चंद्रमोलिं सदाशिवमादित्यस्याधिदेवं रुद्रमावा॰
त दक्षिणपूर्वदले॥ ॐ भूः सोममावा॰ ॐ भुवः सोममा॰ ॐ स्वः सोम
मा॰ ॐ भूर्भुवःस्वः सोममा॰ आप्यायस्वेत्यस्य गोतम ऋषिः सोमोदे
वता गायत्री छंदः॥ सोमावाहने वि॰ ॐ आप्यायस्व समेतु ते विश्वतः
सोम वृष्ण्यं॥ भवा वाजस्य संगथे॥ इमं मंत्रमुच्चार्य भगवन्सोम द्वि
जाधिपते सुधामयशरीर अत्रिगोत्र यमुनादेशोद्भव गोक्षीरधव ११
लांग कांते द्विभुज गदा वरदानांकितकर शुक्लांबर माल्यानुलेपन स
गामुक्त र्वांगं मोक्तिकाभरणरमणीय समस्तलोकाप्यायक देवतास्वाद्यमूर्ते

नमस्तेसन्नद्धधवलध्वजपताकोपशोभितेनदशाश्वेताश्वरथवाहनेनमेरुंप्रदिक्षिणीकुर्वन्नागच्छाभिद्रुमयासहपश्चाग्नेयदलमध्येस्फटिकप्रतिमांप्रत्यङ्मुखींचतुरस्रपीठेधितिष्ठपूजार्थंत्वामावा॰तद्दक्षिणपार्श्वे॥ॐभूःसोमाधिदेवताअपःआवाहयामि॥ॐभुवःसोमाधिदेवताअपःआ॰ॐस्वःसोमाधिदेवताअपःआ॰ॐभूर्भुवःस्वःसोमाधिदेवताअपः[redacted]आ॰ॐअप्सुमेसोमइत्यस्यसिंधुद्वीपऋषिःआपोदेवतागायत्रीछंदः॥अपावाहनेवि॰ॐअप्सुमेसोमोअब्रवीदंतर्विश्वानिभेषजा॥अग्निंचविश्वशंभुवं॥इमंमंत्रमुच्चार्यस्त्रीरूपधारिणीःश्वेतवर्णीःमकरस्था

१२ हनाःपात्राकलशाधारिणीःमुक्ताभरणभूषिताःसोमाधिदेव
ताऽअपःआवाहयामि॥तद्वामपार्श्वे॥ॐभूःसोमप्रत्यधिदेव
ताऽमुमामावा॰ॐभुवःसोमप्रत्यधिदेवताऽमुमामा॰ॐस्वःसोम
प्रत्यधिदेवताऽमुमामा॰ॐभूर्भुवःस्वःसोमप्रत्यधिदेवताऽमुमा
मा॰गौरीर्मिमायेत्यस्यदीर्घतमाऋषिःउमादेवताजगतीछंदः॥
उमावाहनेवि॰ॐगौरीर्मिमायसलिलानितक्षत्येकपदीद्विप १२
दीसाचतुष्पदी॥अष्टापदीनवपदीबभूवुषीसहस्राक्षरापरमे
व्योमन्॥इमंमंत्रमुच्चार्यअक्षसूत्रकमलदर्पणमंडलुधारिणीं क
त्रिदशपूजितांसोमप्रत्यधिदेवतामुमामा॰॥२॥दक्षिणदले॥ॐ

भूरंगारकमावा॰ ओं भुवरंगारकमा॰ ॐ स्वरंगारकमा॰ ॐ भू
र्भुवःस्वरंगारकमा॰ अग्निर्मूर्धेत्यस्यविरूपऋषिः॰ अंगारकोदे
वतागायत्रीछंदः॥ अंगारकावाहनेवि॰ ॐ अग्निर्मूर्धादिवः
ककुत्पतिःप्रथिव्याअयं॥ अपांरेतांसिजिन्वति॥ इमंमंत्रमु
च्चार्यभगवन्नंगारकअग्नारूते [redacted] भारद्वाजगोत्रावंतिदे
जौंपमां शेखरज्वालाकुंजांगद्युतेचतुर्भुजशक्तिशूलगदाखड्गांगधारि
णेरक्तांबरमाल्यानुलेपननवालाभरणभूषितसर्वांगदुरालोकदी
प्तेनमस्तेसन्नध्दरक्तध्वजपताकोपशोभितेनरक्तमेषरथवाहनेनमे
रुंप्रदक्षिणीकुर्वन्नागच्छभूमिस्कंदाभ्यांसहपद्मदक्षिणदलम

ध्येरक्तचंदनप्रलिमांदक्षिणामुखींत्रिकोणपीठेऽधितिष्ठपूजार्थेत्वा
मावाहयामितद्दक्षिणपार्श्वे ।। ॐ भूरंगारकाधिदेवतांभूमिमावा०
ॐ भुवरंगारकाधिदेवतांभूमिमा ॐ स्वरंगारकाधिदेवतांभूमिमा०
ॐ भूर्भुवःस्वरंगारकाधिदेवतांभूमिमा० स्योनापृथिवीत्यस्यमेधा
तिथिर्ऋषिःपृथिवीदेवतागायत्रीछंदः ।। भूम्यावाहनेविनियोगः ।।
ॐ स्योनापृथिविभवान्नृक्षरानिवेशनी ।। यच्छानःशर्मसप्रथः ।।
इमंमंत्रमुच्चार्यशुक्लवर्णांदिव्याभरणभूषितांचतुर्भुजांसौम्यव
पुषंचंडांशुसहस्रांवरांरत्लपात्रसस्यपात्रौषधिपात्रपद्मोपेतक
रांचतुर्दिङ्नागगृहगतांअंगारकाधिदेवतांभूमिमावा० तद्वामपा

श्वें॥ॐ भूरंगारकप्रत्यधिदेवं स्कंदमावा० ॐ भुवरंगारकप्रत्यधिदेवं
स्कंदमा० ॐ स्वरंगारकप्रत्यधिदेवं स्कंदमा० ॐ भूर्भुवः स्वरंगारकप्र
त्यधिदेवं स्कंदमा० कुमारश्चित्पितरमित्यस्य गृत्समदऋषिः स्कंदो
देवता त्रिष्टुप् छंदः॥ॐ कुमारश्चित्पितरं वंदमानं प्रति नानाम रुद्रो
पयंतं॥ भूरेर्दातारं सत्पतिं गृणीषे स्तुतस्त्वं भेषजा रास्यस्मे॥ ॐ ममं
न्नं मच्चार्यषण्मुखं शिखंडकविभूषणं रक्तांबरधरं मयूरयानं कुक्कु वाहनं
टघंटापताकारात्युपेतं चतुर्भुजमंगारकप्रत्यधिदेवं स्कंदमा०॥३॥
ततः प्रागुत्तरदले॥ ॐ भूः बुधमावा ॐ भुवर्बुधमा० ॐ स्वर्बुधमावा
हयामि॥ ॐ भूर्भुवः स्वर्बुधमा० ॐ उद्बुध्यध्वामित्यस्य बुधऋषिः सोमो

देवनात्रिष्टुप् छंदः ॥ बुधावाहने वि० ॐ उद्बुध्यध्वं समनसः सखा
१४ यः समग्निमिंध्वं बहवः सनीळाः ॥ दधिक्रामग्निमुषसं च देवीमिंद्रा
वतोवसे नि ह्वये वः ॥ इमं मंत्रमुच्चार्य भगवन्सौम्य सोम्याहूते सर्वज्ञा
नेमयात्रिगोत्र मगधदेशोद्भव कुंकुमवर्णांगद्युते चतुर्भुज खड्गखे
टगदावरदानांकितकर पीतांबरमाल्यानुलेपन मरकताभर
णाद्यलंकृत सर्वांग विबुधमतेन नमस्ते सन्नद्ध पीतध्वजपताको
पशोभितेन चतुःसिंहरथवाहनेन मेरुं प्रदक्षिणीकुर्वन्नागच्छ १४
ह १ प विष्णुपुरुषाभ्यां सहैशानदले मध्ये सुवर्णप्रतिमां उदङ्मुखीं बा
णाकारपीठेधितिष्ठ पूजार्थं त्वामावा० न दक्षिणपार्श्वे ॥ ॐ भूः सो

म्याधिदेवं विष्णुमा० ॐ भुवः सौम्याधिदेवं विष्णुमा० ॐ स्वः सौम्या
धिदेवं विष्णुमा० ॐ भूर्भुवः स्वः सौम्याधिदेवं विष्णुमा० इदं विष्णु
रित्यस्य काण्वो मेधातिथिर्ऋषिः विष्णुर्देवता गायत्री छंदः ॥ विष्णवा
वाहने वि० ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं ॥ समूळ्हम
स्य पांसुरे ॥ इमं मंत्रमुच्चार्य कौमोदकीपद्मशंखचक्रोपेतचतुर्भु
जं सौम्याधिदेवं विष्णुमा० तद्धाम पार्श्वे । ॐ भूः सौम्य प्रत्याधि
देवं पुरुषमा० ॐ भुवः सौम्य प्रत्यधिदेवं पुरुषमा० ॐ स्वः सौ
म्य प्रत्यधिदेवं पुरुषमा० ॐ भूर्भुवः स्वः सौम्य प्रत्यधिदेवं पुरु
षमा० सहस्रशीर्षेत्यस्य नारायण ऋषिः पुरुषो देवता अनुष्टुप्छंदः ॥

पुरुषा वाहने वि॰ ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ॥ सभू
१५ मिं विश्वतो वृत्वात्यतिष्ठद्दशांगुलं ॥ इमं मंत्रमुच्चार्य कौमोदकीप
द्मशंखचक्रोपेतं चतुर्भुजं सौम्यं प्रत्यधिदेवं पुरुषमा॰ ॥ ४ ॥ उत्तरे ॥
ॐ भूर्बृहस्पतिमा॰ ॐ भुवर्बृहस्पतिमा॰ ॐ स्वर्बृहस्पतिमा॰ ॐ
भूर्भुवःस्वर्बृहस्पतिमा॰ बृहस्पते अतीत्यस्य गृत्समद ऋषिर्बृ
हस्पतिर्देवता त्रिष्टुप् छंदः ॥ बृहस्पत्यावाहने वि॰ ॐ बृहस्पते १५
अति यदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु ॥ यद्दीदयच्छवस
ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रं ॥ इमं मंत्रमुच्चार्य भगव
न्बृहस्पते समस्तदेवताचार्यांगिरसगोत्रसिंधुदेशेश्वर ह्यागत्स

वर्णसदृशादीप्तचतुर्भुजदंडकमंडल्वक्षसूत्रवरदानांकितकरपी
तांबरमाल्यानुलेपनपुष्परागमयाभरणरमणीयसमस्तविद्या
धिपतेनसमस्तसैन्यधृतपीतध्वजपताकोपशोभितेनपीताश्वरथ
वाहनेनमेरुंप्रदक्षिणीकुर्वन्नागेंद्रब्रह्मभ्यांसहपूर्वोत्तरदल
मध्येसुवर्णप्रतिमामदस्मुखींदीर्घचतुरस्रपीठेऽधितिष्ठपू
जार्थंत्वामा० न दक्षिणपार्श्वे॥ ॐ भूर्वेह सत्याधिदेवेंद्रमावा०
ॐ भुवर्वेह सत्याधिदेवेंद्रमावा० ॐ स्वर्वेह सत्याधिदेवेंद्रमा०
ॐ भूर्भुवःस्वर्वेह सत्याधिदेवेंद्रमा० इंद्रश्रेष्ठानीत्यस्य गत्समद
ऋषिरिंद्रोदेवतात्रिष्टुप्छंदः॥ इंद्रावाहनेवि० ॐ इंद्रश्रेष्ठानिद्रविं

ग०ग्र०प०

णानिधेहि चित्तिं दक्षस्य सुभगत्वमस्मे ॥ पोषं रयीणामरिष्टिं तनूनां स्वा
१६ द्मानं वाचः सुदिनत्वमह्नां ॥ इमं मंत्रमुच्चार्य चतुर्दंत गजारूढं वज्रां
कुशाधरं शचीपतिं नानाभरणभूषितं इह सत्याधिदेवं इंद्रमावाह०
तद्धामपानुर्वे ॥ ॐ भूर्बृहस्पतिप्रत्यधिदेवं ब्रह्माणमावाह० ॐ भु
वर्बृहस्पतिप्रत्यधिदेवं ब्रह्माणमावा० ॐ स्वर्बृहस्पतिप्रत्यधि
देवं ब्रह्माणमावा० ॐ भूर्भुवः स्वर्बृहस्पतिप्रत्यधिदेवं ब्रह्माण १६
मा० ब्रह्मणाते ब्रह्मयुजेत्यस्य विश्वामित्र ऋषिर्ब्रह्मादेवता त्रिष्टुप्
छंदः ॥ ब्रह्मावाहने वि० ॐ ब्रह्मणा ते ब्रह्मयुजा युनज्मि हरी
सखाया सधमाद आशू ॥ स्थिरं रथं सुखमिंद्राधितिष्ठन्प्रजान

न्विद्धुऽउपं याहि सोमं ॥ इमं मंत्रमुच्चार्य पद्मासनस्थं जटिलं चतु
र्मुखं अक्षमालास्रुवपुस्तककमंडलुधारिणं कृष्णाजिनवाससं पार्श्व
स्थितहंसं बृहस्पतिप्रत्याधिदेवं ब्रह्माणमावा० ॥ ५ ॥ ततः प्राग्दले ॐ
भूः शुक्र मा० ॐ भुवः शुक्रमा० ॐ स्वः शुक्र मा० ॐ भूर्भुवः स्वः शुक्र
मा० शुक्रं ते अन्यदित्यस्य भरद्वाजऋषिः शुक्रो देवता त्रिष्टुप्छंदः ॥ शु
क्रावाहने वि० ॐ शुक्रं ते अन्यद्यजतं ते अन्यद्विषुरूपे अहनी द्यौरि
वासि ॥ विश्वाहि माया अवसि स्वधावो भद्राते पूषन्निह रातिर[illegible]
स्तु ॥ इमं मंत्रमुच्चार्य भगवन्भार्गव समस्तदैत्यगुरो भार्गवगोत्र भो
जकटदेशोद्भव रजतोज्वलांगकांते चतुर्भुजदंडकमंडल्वक्षस

त्रवरदानांकितकरशुक्लांबरमाल्यानुलेपनवस्त्राभरणाभूषितसर्वां
17 गसमस्तभीतिरागल्लनिपुणमनेनमस्तेसंनध्दशुक्लध्वजपताको
पशोभितेनशुक्लाश्वसहितेनरथेनमेरुंप्रदक्षिणीकुर्वन्नागच्छं द्रा
णींद्राभ्यांसहपूर्वदलमध्येरजनप्रतिमांप्राङ्मुखीं पंचकोणपीठे
धितिष्ठपूजार्थंत्वामावा॰ तद्दक्षिणपार्श्वे॥ॐ भूःशुक्राधिदेव
तामिंद्राणीमा॰ॐ भुवःशुक्राधिदेवतामिंद्राणीमा॰ॐ स्वःशु 17
क्राधिदेवतामिंद्राणीमा॰ॐ भूर्भुवःस्वःशुक्राधिदेवतामिंद्राणी
मा॰इंद्राणीमास्वितस्यस्यवषाकपिर्ऋषिः इंद्राणीदेवतापंक्तिश्छं
दः॥इंद्राण्यावाहनेवि॰ॐ इंद्राणीमासुनारिषुसुभगामहमश्रवं॥

नस्यं स्या अपरं च न जरसा मरते पतिर्विश्वस्मादिंद्र उत्तरः ॥ इमं मंत्र
मुच्चार्य संतानमंजरीवरदानधरद्विभुजां शुक्राधिदेवतामिंद्राणी
मावा० यामपार्श्वे ॥ ॐ भूः शुक्रप्रत्यधिदेवमिंद्रमा० ॐ भुवः
शुक्रप्रत्यधिदेवमिंद्रमा० ॐ स्वः शुक्रप्रत्यधिदेवमिंद्रमा०
ॐ भूर्भुवः स्वः शुक्रप्रत्यधिदेवमिंद्रमावा० इंद्रमिंद्रदेवतात
य इत्य[redacted]स्य मेधातिथिर्ऋषिरिंद्रो देवता भो बृहती छंदः ॥ इंद्रा प्रगाथो
वाहने विनि० ॐ इंद्रमिंद्रदेवतातय इंद्रं प्रयत्यध्वरे ॥ इंद्रं समीके व
निनो हवामह इंद्रं धनस्य सातये ॥ इमं मंत्रमुच्चार्य चतुर्दंतगजा
रूढं वज्रांकुशाधरं प्राचीपतिं नानाभरणभूषितं भार्गवप्रत्यधि

ग्र०म०य० देवमिंद्र मा०॥६॥ पश्चिमदले॥ ॐ भूः शनैश्वर मा० ॐ भुवः श
१८ नैश्वर मा० ॐ स्वः शनेर मावाह० ॐ भूर्भुवः स्वः शनैर् मा० शम श्व
ग्निरित्यस्य रिरिंबिठिर्ऋषिः शनैश्वरो देवता उष्णि[illegible]क्छंदः॥
शनैश्वरावाहने वि० ॐ शमग्नैंभिः करच्छन्नस्तपतु सूर्यः॥ शं रग्नि
वातोवात्वरपा० अपस्त्रिधः॥ इमं मंत्रमुच्चार्य भगवन् शनैश्वर
भास्करतनय काश्यपगोत्र सुराष्ट्रदेशेश्वर कज्जलसमानांग
कांते चतुर्भुज चापतूणीरहू पाणाभयांकितकर नीलांबरमा १८
ल्यानुलेपन नीलरत्नभूषणालंकृत सर्वांग समस्तभुवनभी
षणामर्षमूर्ते नमस्ते सन्नध्द नीलध्वजपताकोपशोभितेन

नीलग्रध्नरथवाहनेन मेरुं प्रदक्षिणीकुर्वन्नागच्छ प्रजापतियमा
भ्यांसहपश्चिमदलमध्ये कालायसप्रतिमां त्र्यङ्गुरवींचापा
कारपीठेधितिष्ठ पूजार्थं त्वामावा० तद्दक्षिणपार्श्वे ॥ ॐ भूःस्थानेरा
धिदेवं प्रजापतिमा० ॐ भुवःस्थानेश्वराधिदेवं प्रजापतिमा० ॐ
स्वःस्थानेश्वराधिदेवं प्रजापतिमा० ॐ भूर्भुवःस्वःस्थानेश्वराधिदे
वं प्रजापतिमा० प्रजापतेनत्वदित्यस्य हिरण्यगर्भऋषिः प्रजापति
र्देवता त्रिष्टुप् छंदः ॥ प्रजापत्यावाहने वि० ॐ प्रजापते न त्वदेता
न्यन्यो विश्वाजातानि परिता बभूव ॥ यत्कामास्ते जुहुमस्तं नो अस्तु
वयं स्याम पतयोरयीणां ॥ इमं मंत्रमुच्चार्य यज्ञोपवीतिनं हंसस्थ

ग्र॰न्न॰प०

मेकवक्त्रं अक्षमालास्रुक्पुस्तककमंडलुसहितंचतुर्भुजंशनैश्चरा १९
धिदेवंप्रजापतिमा० तद्वामपार्श्वे ॥ ॐ भूः शनैश्चरप्रत्यधिदेवंय
ममावा० ॐ भुवः शनैश्चरप्रत्यधिदेवंयममा० ॐ स्वः शनैश्चरप्र
त्यधिदेवंयममा० ॐ भूर्भुवःस्वः शनैश्चरप्रत्यधिदेवंयममा०
यमायसोममित्यस्ययमऋषिः यमोदेवताऽनुष्टुप्छंदः ॥ यमावाह
विनि० ॐ यमायसोमंसुनुतयमायजुहुताहविः ॥ यमंहयज्ञो १९
गच्छत्यग्निदूतोअरंकृतः ॥ इममंत्रमुच्चार्य ईषत्पीनंदंडह
स्तंरक्तसर्वांगंपाशधरंकृष्णवर्णंमहिषारूढंसर्वाभरण
भूषितंशनैश्चरप्रत्यधिदेवंयममा० ॥ ७ ॥ प्राग्दक्षिणदलाग्ने ॥

ॐ भूः राहु मा० ॐ भुवः राहु मा० ॐ स्वः राहु मा० ॐ भूर्भुवः स्वः राहु मा० क
यानश्चित्र इत्यस्य वामदेव ऋषिः राहुर्देवता गायत्री छंदः ॥ राह्वावाह
ने वि० ॐ कयानश्चित्र आभुवदूती सदावृधुः सखा ॥ कयाश्चेष्ठ्याचिष्ठ
यावृता ॥ इमं मंत्रमुच्चार्य भगवन्राहो रविसोममर्दन सिंहिकानंदन
पैठीनसगोत्र बर्वरदेशोत्स्वर कालमेघधुने व्याघ्रवदन चतुर्भुज खड्ग
चर्मशूलवरदानांकित क्रूर कृष्णांवर माल्यानुलेपन गोमेदका
भरणभूषितसर्वांग शौर्यनिधे नमस्ते सन्नद्ध कृष्णध्वजपताको
पशोभितेन कृष्णसिंहरथवाहनेन मेरुं प्रदक्षिणं कुर्वन्नागच्छ सर्प णी
कालाभ्यां सह पश्चनैर्ऋत्य दलमध्ये सीसकप्रतिमां दक्षिणामुखीं

शूर्पाकारपीठेधितिष्ठपूजार्थंत्वामावाह॰ तद्दक्षिणपार्श्वे।ॐ भूः रा
ह्वधिदेवान्सर्पानावा॰ ॐ भुवः राह्वधिदेवान्सर्पानावा॰ ॐ स्वः राह्व
धिदेवान्सर्पानावा॰ ॐ भूर्भुवः स्वः राह्वधिदेवान्सर्पानावा॰ आयंगौ
रित्यस्यसार्पराज्ञी ऋषिः सर्पदेवता गायत्री छंदः॥ सर्पावाहने वि॰
ॐ आयंगौः पृश्निरक्रमीदसदन्मातरंपुरः॥ पितरंच प्रयन्त्स्वः॥ इ
मंमंत्रमुच्चार्य अक्षसूत्रधरान्कुंडिकाकारपुच्छयुक्तानेकभोगान्
त्रिभोगान्भीषणान्राह्वधिदेवताः सर्पानावा॰ तद्वामपार्श्वे।ॐ
भूः राहुप्रत्यधिदेवं कालमा॰ ॐ भुवः राहुप्रत्यधिदेवं कालमा॰
ॐ स्वः राहुप्रत्यधिदेवं कालमा॰ ॐ भूर्भुवः स्वः राहुप्रत्यधिदेवं

कालमा० परं मृत्योइत्यस्य संकुसुक ऋषिः मृत्युर्देवता त्रिष्टुप्छं
दः॥ कालावाहने वि० ॐ परं मृत्यो अनु परेहि पंथां यस्ते स्व इतरो
देवयानात्॥ चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजां रीरिषो मोत
वीरान्॥ इमं मंत्रमुच्चार्य करालवदनं नित्यांगं भीषणं पाशदंडधरं
सर्पवृश्चिकरोमाणं राहु मृत्याधिदेवं कालमा०॥८॥ प्रत्यगुत्तरदले॥
ॐ भूः केतुमा० ॐ भुवः केतुमा० ॐ स्वः केतुमा० ॐ भूर्भुवःस्वः
केतुमा० केतुं कृण्वन्नित्यस्य मधुछंदा ऋषिः केतुर्देवता गायत्रीछं
दः॥ केत्वावाहने वि० ॐ केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे॥
समुषद्भिरजायथाः॥ इमं मंत्रमुच्चार्य भगवन्केतो कामरूपजे

मिनिगोत्रमध्यदेशोद्भवरक्तवर्णध्वजाहृते द्विभुजगदावरदानांकितक
२३ र चित्रांबरमाल्यानुलेपनवैडूर्यमयाभरणभूषितसर्वांगचित्रश
क्तेन मस्तेसन्नद्धचित्रध्वजपताकोपशोभितेनचित्रकपोतरथवा
कुर्व हनेन मेरुं प्रदक्षिणीँन्नागछ ब्रह्मचित्रगुप्ताभ्यांसह पश्चवायव्यद
लेमध्ये कांस्यप्रतिमां दक्षिणामुखीं ध्वजाकारपीटेऽधितिष्ठपू
जार्थंत्वा मा०तद्दक्षिणपार्श्वे॥ॐ भूः केत्वधिदेवं ब्रह्माणमा०ॐ
भुवः केत्वधिदेवं ब्रह्माणमा०ॐ स्वः केत्वधिदेवं ब्रह्माणमा०ॐ २१
भूर्भुवस्वः केत्वधिदेवं ब्रह्माणमा० ब्रह्मजज्ञानमित्यस्य नकुल
ऋषिः ब्रह्मादेवतात्रिष्टुप्छंदः॥ब्रह्मावाहने वि०ॐ ब्रह्मजज्ञानंप्र

थमंपुरस्ताद्विसीमतःसुरुचोविनआवः॥सबुध्याउपमाअस्यविष्ठाः
सतश्चयोनिमसतश्चविवः॥इमंमंत्रमुच्चार्यपद्मासनस्थंजटिलंचतु
र्मुखंअक्षमालास्त्रुवपुस्तककमंडलुधरंकृष्णाजिनवाससंपार्श्व
स्थितहंसंकेतुअधिदेवंब्रह्माणमा॰तद्वामपार्श्वे॥ॐभूःकेतुप्रत्यधि
देवंचित्रगुप्तमा॰ॐभुवःकेतुप्रत्यधिदेवंचित्रगुप्तमा॰ॐस्वःकेतु
प्रत्यधिदेवंचित्रगुप्तमा॰ॐभूर्भुवःस्वःकेतुप्रत्यधिदेवंचित्रगुप्त
मा॰सच्चित्रचित्रमित्यस्यभरद्वाजऋषिःचित्रगुप्तोदेवतात्रिष्टुप्
छंदः॥चित्रगुप्तावाहनेवि॰ॐसचित्रचित्रंचितयंतमस्मेचित्र
क्षत्रचित्रतमंवयोधां॥चंद्रंरयिंपुरुवीरंबृहंतंचंद्रभिर्गृणतेयुवस्व॥

चंद्र

२२ वे इमं मंमुच्चार्य उदीच्यवेषधरं सौम्यदर्शनं लेखनीपत्रोपेतद्विभुजं के
तुप्रत्यधिदेवं चित्रगुप्त मावा०॥१॥ अथ कर्मसाद्गुण्यकरदेवतावाहनं॥
शुक्लतंडुलपीठेषु कुर्यात्॥ तत्रायं क्रमः॥ ईशाने वायुप्रदेशे॥ ॐ भूः वि
नायकमावा० ॐ भुवः विनायकमा० ॐ स्वः विनायकमा० ॐ भूर्भुवः
स्वः विनायकमा० आतून इंद्रेत्यस्य काण्वःकुसीदीऋषिः विनायको
देवता गायत्री छंदः॥ विनायकवाहने वि० ॐ आतूनइंद्रक्षुमंतंचि २२
त्रंग्राभंसंगृभाय॥ महाहस्तीदक्षिणेन॥ इमं मंत्रमुच्चार्य चतुर्भु
जं त्रिनेत्रं गजाननं नागयज्ञोपवीतिनं चंद्रधरं दंताक्षमालापरशुमो
दकोपेतचतुर्भुजं विनायकमा०॥१॥ तद्दक्षिणतः॥ ॐ भूः दुर्गामा० ॐ

भुवः दुर्गामा० ॐ स्वः दुर्गामा० ॐ भूर्भुवः स्वः दुर्गामा० जातवेदस इत्यस्य
कश्यप ऋषिः दुर्गा देवता त्रिष्टुप् छंदः ॥ दुर्गावाहने वि० ॐ जातवेदसे
सुनवाम सोममरातीयतो निदहाति वेदः ॥ स नः पर्षदति दुर्गाणि विश्वा
नावेव सिंधुं दुरितात्यग्निः ॥ इमं मंत्रमुच्चार्य शक्तिबाणशूलखड्गच
क्रचंद्रबिंबखेटककपालपाशपरशुटंकोपेत दशभुजां सिंहारूढां दु
र्गा रव्यदैत्यासुहारिणीं दुर्गामा० ॥ २ ॥ तद्दक्षिणतः ॐ भूः क्षेत्रपा
लमा० ॐ भुवः क्षेत्रपालमावा० ॐ स्वः क्षेत्रमा० ॐ भूर्भुवः स्वः
क्षेत्रपालमा० क्षेत्रस्य पतिनेत्यस्य वामदेव ऋषिः क्षेत्रपालो देव
ताऽनुष्टुप् छंदः ॥ क्षेत्रपालावाहने वि० ॐ क्षेत्रस्य पतिना वयं हि

२३ तेनैवजयामसि॥ गामश्वैपोषयित्वासनोमृळातीदृशे॥ इमंमंत्रमु
च्चार्यध्यामैर्णत्रिलोचनंऊर्ध्वकेशंसदंष्ट्रंभ्रुकुटीकुटिलाननंनू
पुरालंकृतांघ्रिंसर्पमेखलयायुतंसर्वांगंमैंवृश्चिकुधंक्षुद्रघंटावब
द्धंगुल्फावलंविन्टकरोटिमालाधारिणमुरगकौपीनंचंद्रमौलिं
दक्षिणहस्तेःशूलवेतालखभडंडुभींदधानंवामहस्तेःकपाल
घंटाचर्मचापान्दधानंभीमंदिग्वाससंअसितद्युतिंक्षेत्रपालमा॰
॥३॥तद्दक्षिणतः॥ॐभूःवायुमा॰ॐभुवःवायुमा॰ॐस्वःवायु २३
मा॰ॐभूर्भुवःस्वःवायुमा॰ क्राणाशिशुरित्यस्यत्रितऋषिर्वायु
र्देवताउष्णिक्छंदः॥वाय्वावाहनेवि॰ॐक्राणाशिशुर्महीनां[illegible]

[illegible]ं हिन्वन्नूतस्य दीधितिं ॥ विश्वापरि प्रियाभुवद्धद्विता ॥ ३ इमं मं
त्रमुच्चार्य धावध्वरिणप्टष्ठगतं ध्वजवरदानधारिणं धुम्रवर्णंवा
यु[illegible]मावाहयामि ॥ ४ ॥ तद्दक्षित: ॐ भू: आकाशमा० ॐ भुवः
आकाशमा० ॐ स्वराकशमा० ॐ भूर्भुवःस्वराकाशमा० आदित्
त्नस्येत्यस्य वत्सऋषिः अंतरिक्षं देवता गायत्री छंदः आकाशावा
हने वि० ॐ आदित्प्रत्नस्य रेतसो ज्योतिष्पश्यंति वासरं ॥ परोय
दिध्यते दिवा ॥ इमं मंत्रमुच्चार्य नीलोत्सलाभं नीलांबरधारिणं
चंद्राकौपेतं द्विभुजं षंढ माकाशमा० ॥ ५ ॥ तद्दक्षिणत: ॐ भूर
श्विनावावा० ॐ भुवरश्विनावावा० ॐ स्वरश्विनावावा० ॐ भू

र्भुवःस्वरश्विनावा॰आश्विनावर्तिरित्यस्यराहूगणोगोतमऋषिःअ
श्विनोदेवताउष्णिकछंदः॥अन्व्यावाहनेविनि॰ॐआश्विनावर्ति
रस्मदागोमद्दस्राहिरण्यवत्॥अर्वाग्रथंसमनसानियंछतं॥इ
मंमंत्रमुच्चार्यप्रत्येकमोषधिपुस्तकोपेतदक्षिणवामहस्तावन्यो
न्यसंयुक्तदेहौएकस्यदक्षिणपार्श्वेअपरस्यवामपार्श्वेरत्नभां
रकरश्शुक्लांबरधारिनारीयुग्मोपेतौदेवभिषजोअश्विनावावा
हयामि॥६॥अथक्रतुसंरक्षकइंद्रादिलोकपालावाहनंपूर्वक्तं
ऽडलपीठेषुकुर्यात्॥तत्रायंक्रमः॥तत्रप्राग्दलाग्रे॥ॐभूरिंद्रमा॰
ॐभुवरिंद्रमा॰ॐस्वरिंद्रमा॰ॐभूभुवःस्वरिंद्रमा॰इंद्रंवइत्यस्य

मधुछंदाऋषिः इंद्रोदेवता गायत्री छंदः ।। इंद्रावाहने वि० ॐ इंद्रं
वोविश्वतस्परिहवामहेजनेभ्यः ।। अस्माकमस्तुकेवलः ।। इमंमंत्र
मुच्चार्यस्वर्णसहस्राक्षं वज्रपाणिं शचीप्रियामिंद्र मा० १ ।। आग्ने
यदलाग्ने ।। ॐ भूरग्निमा० ॐ भुवरग्निमा० [redacted] ॐ स्व
रग्निमा० ॐ भूर्भुवः स्वरग्निमा० [illegible] अग्निमीळ इत्यस्य मधुछंदा
ऋषिः अग्निर्देवता गायत्री छंदः ।। अग्न्यावाहने वि० ॐ अग्निमी
ळे पुरोहितं यज्ञस्य देवमृत्विजं ।। होतारं रत्नधातमं ।। इमंमंत्रमु
च्चार्यस्वर्णवर्णसप्तार्चिषं सप्तहस्तं शाक्तयन्न [redacted] स्रुक्स्रु
वतोमरव्यजनघृतपात्राणि दधानं स्वाहाप्रियं मेषवाहनमग्निमा० ।। २ ।।

याम्यदलाग्रे॥ ॐ भूर्य ममा० ॐ भुवर्य म मा० ॐ स्वर्य ममा० ॐ भूर्भु
वः स्वर्य ममा० यमायसोममित्यस्य यमऋषिः यमो देवताऽनुष्टुप्
छंदः॥ यमावाहने वि० ॐ यमायसोमंसुनुतयमायजुहताहविः
यमंहयज्ञोगच्छत्यग्निदूतोअरंकृतः॥ इमं मंत्रमुच्चार्य रक्तवर्ण
दंडधरं महिषवाहनं मिलाग्नियं यम मा०॥ नैर्ऋत्यदलाग्रे॥ ॐ भूः
निर्ऋति मा० ॐ भुवः निर्ऋति मा० ॐ स्वः निर्ऋति मा० ॐ भूर्भु
वः स्वः निर्ऋति मा० मोषुणइत्यस्य घोरः कण्वऋषिः निर्ऋतिर्देव
ता गायत्री छंदः॥ निर्ऋत्यावाहने वि० ॐ मोषुणः परापरा निर्ऋतिर्दु
र्हणावधीत॥ पदीष्टतृष्ण्यासह॥ इमं मंत्रमुच्चार्य नीलवर्णं खड्गं

र्मधरं ऊर्ध्वकेशं नरवाहनं कालिकाप्रियं निर्ऋति मा० ॥४॥ पश्चिमद
लाग्रे ॥ ॐ भूः वरुण मा० ॐ भुवः वरुण मा० ॐ स्वः वरुण मा० ॐ भूर्भुवः
स्वः वरुण मा० उदुत्तमं मुमुग्धि न इत्यस्य शुनःशेपऋषिः वरुणो देवता गा
यत्री छंदः ॥ वरुणावाहने वि० ॐ उदुत्तमं मुमुग्धि नो वि पाशं मध्यमं चृ
त ॥ अवाधमानि जीवसे ॥ इमं मंत्रमुच्चार्य रक्तभूषणं नागपाशधरं मकर
वाहनं पद्मिनीप्रियं सुवर्णवर्णं वरुण मा० ॥५॥ वायव्यदलाग्रे ॥ ॐ भूः
वायु मा० ॐ भुवः वायु मा० ॐ स्वः वायु मा० ॐ भूर्भुवः स्वः वायु मा०
तव वायो इत्यस्यांगिरसो व्यश्वऋषिः वायुर्देवता गायत्री छंदः ॥ वाय्वा
वाहने वि० ॐ तव वायवृतस्पते त्वष्टुर्जामातरद्भुत ॥ अवांस्या वृणीमहे ॥

इमंमंत्रमुच्चार्यश्यामवर्णंहेमदंडधरंकृष्णमृगवाहनंजगत्प्राणरूपंमोहि
२६ नीप्रियंवायुमा०॥६॥उत्तरदलाग्रे॥ॐभूःकुबेरमा०ॐभुवःकुबेरमा०ॐ
स्वःकुबेरमा०ॐभूर्भुवःस्वःकुबेरमा०त्वंनःसोमविश्वतइत्यस्यराहूगणो
गोतमऋषिःसोमोदेवतागायत्रीछंदः॥कुबेरावाहनेवि०ॐत्वंनःसोमवि
श्वतोरक्षाराजन्नघायतः॥नरिष्येत्वावतःसखा॥इमंमंत्रमुच्चार्यस्वर्ण
वर्णंनिधीश्वरंकुंतपाणिमश्ववाहनंचित्रिणीप्रियंकुबेरमा०ऐशा
नदलाग्रे॥ॐभूरीशानमा०ॐभुवरीशानमा०ॐस्वरीशानमा०ॐ २६
भूर्भुवःस्वरीशानमा०कद्रुद्रायेत्यस्यकण्वऋषिःरुद्रोदेवतागायत्री
छंदः॥ईशानावाहनेवि०ॐकद्रुद्रायप्रचेतसेमीढुष्टमायतव्यसे॥

वोच्चेभूरशांतमंह्वदे ॥ इमंमंत्रमुच्चार्यश्शुध्दस्फटिकवर्णवरदाभय
शूलाक्षसूत्रधरं वृषवाहनं गौरीप्रियमीशानमावाहयामि ॥ ८ ॥ ए
वमेकचत्वारिंशद्देवता आवाह्य कलशोच वरुणं पूर्ववदावाह्य नमोंते
श्चतुर्थ्यंतैः स्वस्वनामभिः क्रमेण पूर्वोक्तद्रव्यैः पुष्पसमर्पणपर्यंतं ग्र
हदेवतापूजां कृत्वा कर्मसाद्गुण्यदेवताः क्रतुसंरक्षकदेवता वरुणं च मल
यज गंधशतपत्रपुष्पैस्तथैव पूजयेत् ॥ पूर्वोक्तद्रव्याणि तु ॥ रक्तचंदनं
मलयजो देवदारुः कुंकुमो मनःशिला शंखपिष्टं केनकीरजः कस्तूरीति
नवानुलेपनानि मलयज एक एव वा सर्वेषां रक्तपद्मं कुमुदं रक्तकर
वीरं पाटलं चंपकं कुंदमिंदीवरं कृष्णाधत्तूरं चित्रवर्णमिति नवपुष्पा

णि॥ रक्तकरवीरमेकमेव वा॥ पुष्पवर्णा अक्षता अहतवस्त्रयुग्मानि॥ कुंदुरुम
यूराज्ञीखादन्नांगसर्जरसो बिल्वफलं श्रीवासं कृष्णागरु जटामांसी मधू
कमिति नवधूपाः॥ गुग्गुलुरेक एव वा॥ सर्पिषा दीपा॥ स्तिलतैलेन वा॥ हविष्या
न्नं पायसं पललान्नं गुडान्नं क्षीरोदनो दध्योदनः कृसरो माषान्नं विचित्रा
न्नमिति नवोपहाराः त्रिवृदन्नमेकमेव वा॥ माणिक्यं मौक्तिकं प्रवालं मर
कतः पुष्परागो वज्रो नीलो गोमेदकं वैडूर्यमिति नवरत्नान्येकरत्नमे
व वा माणिक्यं॥ इति पूर्वोक्तद्रव्याणि॥ अथ होमः॥ स्वस्वसमिद्भिर्वाज्यैः
प्रतिद्रव्यं प्रतिग्रहं एकावराभिः सहस्रपराभिराहुतिभिर्निमितशक्त्य
नुसारेण प्रधानदेवतादशांशेन पार्श्वदेवतानां [redacted] तदर्धेनेतरेषां स्वा

हांतैर्नामभिस्तत्तन्मंत्रैर्वापाणिनैवसकृद्दवदानेनचरुहोमः॥तत्राचा
र्यःप्रत्यगग्नेरासीनःप्राणानायम्यपूर्ववत्संकल्प्याग्निमुखवक्ष्यमाणप्र
कारेणयथोक्तलक्षणेकुंडेस्थंडिलेवोपलेपाद्यग्निप्रतिष्ठापनांतंकृ
त्वाऋत्विगन्वारब्धःसमिद्द्वयमादायदेशकालौनिर्दिश्यअद्यवक्ष्यमा
णग्रहहोमेदेवतापरिग्रहार्थमन्वाधानंकरिष्ये।अस्मिन्नन्वाहितेग्नावि
त्यादिचक्षुषीआज्येनेत्यंतमुक्त्वाप्रधानदेवतामादित्यमधिदेवतामग्निं
प्रत्यधिदेवतांरुद्रंअर्कसमिच्चर्वाज्यैःप्रधानदेवतांसोममधिदेवताम
पःप्रत्यधिदेवतांगौरींपलाशसमिच्चर्वाज्यैःप्रधानदेवतामंगारकम
धिदेवतांभूमिंप्रत्यधिदेवतांस्कंदंखदिरसमिच्चर्वाज्यैःप्रधानदेवंबु

२८ धमधिदेवं विष्णुं प्रत्यधिदेवं पुरुषमपामार्गसमिच्चार्वाज्यैः प्रधानदेवं बृ
हस्पतिमधिदेवमिंद्रं प्रत्यधिदेवं ब्रह्माणमश्वत्थसमिच्चर्वाज्यैः प्रधानदे
वं शुक्रमधिदेवतामिंद्राणीं प्रत्यधिदेवमिंद्रमौदुंबरसमिच्चर्वाज्यैः प्रधा
नदेवं शनिमधिदेवं प्रजापतिं प्रत्यधिदेवं यमं शमीसमिच्चर्वाज्यैः प्रधा
नदेवं राहुमधिदेवं सर्पान् प्रत्यधिदेवं कालं दूर्वासमिच्चर्वाज्यैः प्रधा
नदेवं केतुमधिदेवं ब्रह्माणं प्रत्यधिदेवं चित्रगुप्तं कुशासमिच्चर्वाज्यैः
विवक्षितसंख्याकैः पार्श्वदेवताः प्रधानदक्षिणोत्तरेण क्रतुसाद्गुण्यदेवताः २८
विनायकं दुर्गां क्षेत्रपालं वायुमाकाशमश्विनौ क्रतुसंरक्षकदेवताः
इंद्रमग्निं यमं नैर्ऋतिं वरुणं वायुं कुबेरमीशानं प्रधानविदिशोत्तरेण अग्निवायुसू

नि

र्य प्रजापतींस्तिलव्रीहिभिर्विवक्षितसंख्यया॥ सूर्यमाज्येनत्रयोदश
वारं अग्निं चतुस्त्रिंशद्वारं द्वात्रिंशद्वारं रुद्रं शेषेण स्विष्टकृतमित्या
दिसर्वो यक्ष्य इत्यंतमुक्त्वा भूर्भुवःस्वःस्वाहे समस्तावाधाय प्रजापत
य इदं न मम इत्युद्देशत्यागं कुर्यात्॥ ततो बर्हिःसंनहनाद्याज्ये दर्भा
ग्रहूय प्रक्षेपांतं कृत्वा लौकिकसिध्दान्नतिलव्रीहिभिः सहाज्यं त्रिः
पर्यग्निकृत्वाज्यमुद्वास्य बर्हिषि निधाय स्रुवस्रुक्संमार्जनं कृत्वा
न्नं पात्रांतरे पृथक्कृसाग्नावधिश्रित्य स्रुवेणाभिघार्योदगुद्वा
स्याज्याद्दक्षिणतो बर्हिष्यासाद्य प्रत्यभिघार्याग्न्यलंकरणाद्याज्य
भागांतं कृत्वा क्रमेणाऽदित्यादीन्ग्रहानां तेभ्य एकचत्वारिंशद्देवेभ्य

२८ आवाहनोक्तैः [redacted] तत्तन्मंत्रैः समिच्चर्वाज्यैः प्रत्युक्तसंख्याका
आहुतीर्जुहुयात् ॥ तत्रायं प्रकारः ॥ समिधं मूलतोग्रगुलं विहाय
मध्यमानामिकांगुष्ठैर्गृहीत्वा जुहुयात् ॥ चरुं नासासमं पाणिने
व ॥ आज्यं स्रुवेणैव तदभावेऽश्वत्थपर्णेन वा ॥ ततो व्यस्तसम
स्तव्याहृतिभिः प्रभूततिलब्रीहीन् पाणिनाहुत्वा सूर्यपाव
करुद्रानाज्येन जुहुयान्मंत्रैः ॥ ते च मंत्राः ॥ सूर्यो न इति पंचर्चस्य
सूक्तस्य सूर्यपुत्रश्चक्षुः सूर्यो गायत्री ॥ आज्यहोमे विनियोगः ॥ ॐ सू २८
र्यो नो दिवस्पातु वातो अंतरिक्षात् ॥ अग्निर्नः पार्थिवेभ्यः स्वाहा ॥ सूर्या
येदं न ममेति सर्वत्र ॥ ॐ जोषा सवितुर्यस्य ते हरः शतं सवाँ अर्हति ॥ पा

हिनो दिद्युतः पतंत्याः स्वाहा॥ ॐ चक्षुर्नो देवः सविता चक्षुर्न उत पर्व
तः॥ चक्षुर्धाता दधातु नः स्वहा॥ चक्षुर्नो धेहि चक्षुषे चक्षुर्विख्यै तनू
भ्यः॥ सं चेदं वि च पश्येम स्वाहा॥ सुसंदृशं त्वा वयं प्रतिपश्येम सूर्य॥ विप
श्येम नृचक्षसः स्वाहा॥ उँ यामेति मंत्रस्य कण्वपुत्रः प्रस्कण्वः सूर्यो गा
यत्री॥ आज्यहोमे वि० ॐ उदु त्यं जातवेदसं देवं वहंति केतवः॥ दृशे विश्वा
य सूर्यं स्वाहा॥ नमो मित्रस्येति मंत्रस्य सूर्यपुत्रोभितपाः सूर्यो जगती॥
आज्यहोमे वि० ॐ नमो मित्रस्य वरुणस्य चक्षसे महो देवाय तदृतं स
पर्यत॥ दूरेदृशे देवजाताय केतवे दिवस्पुत्राय सूर्याय शंसत स्वाहा॥
चित्रं देवानामिति मंत्रस्यांगिरसः कुत्सः सूर्यस्त्रिष्टुप्॥ आज्यहो

३० मेवि॰ ॐ चित्रंदेवानामुदगादनीकं चक्षुर्मित्रस्यवरुणस्याग्नेः ॥ आप्राद्या
वापृथिवीअंतरिक्षंसूर्यआत्माजगतस्तस्थुषश्चस्वाहा ॥ उदेतिसुभगइति
पंचर्चस्य मैत्रावरुणिर्वसिष्ठः सूर्यस्त्रिष्टुप् ॥ आज्यहोमेवि॰ ॐ उदेतिसु
भगोविश्वचक्षाः साधारणः सूर्योमानुषाणां ॥ चक्षुर्मित्रस्यवरुणस्यदेव
श्चर्मैवयः समाविव्यक्तमांसिस्वाहा ॥ ॐ उदेतिप्रसवीताजनानांमहान्के
तुरर्णवः सूर्यस्य ॥ समानंचक्रंपर्याविवृत्सन्यदेतशोवहतिधूर्षुयुक्तःस्वा
हा ॥ ॐ विभ्राजमानउषसामुपस्थाद्रेभैरुदेत्यनुमद्यमानः ॥ एष ३०
मेदेवः सविताचछंदयः समानंनप्रमिनातिधामस्वाहा ॥ ॐ दिवोरुक्म
उरुचक्षाउदेतिदूरेअर्थस्तरणिर्भ्राजमानः ॥ नूनंजनाः सूर्येणप्रसूताअ

युन्नथीनिहूणवृत्रपांसिस्वाहा॥ॐयत्राचक्रुरमृतागातुमस्मैश्येनोनदी
युन्नन्वेतिपाथः॥प्रतिवांसूरउदितेविधेमनमोभिर्मित्रावरुणोतहव्यैस्वा
हा॥त्वमग्नेप्रथमइत्यष्टादशर्चस्यसूक्तस्यांगिरसोहिरण्यस्तूपोऋषिर्ज
गतीअंत्याष्टमीयोऽस्यास्त्रिष्टुभः॥आज्यहोमेविनियोगः॥ॐत्वमग्ने
प्रथमोअंगिराऽऋषिर्देवोदेवानामभवःशिवःसखा॥तवव्रतेकवयोवि
द्मनापसोजायंतमरुतोभ्राजदृष्टयःस्वाहा॥अग्नयइदंनममेतिसर्व
त्र॥ॐत्वमग्नेप्रथमोअंगिरस्तमःकविर्देवानांपरिभूषसिव्रतं॥वि
भुर्विश्वस्मैभुवनायमेधिरोद्विमाताशयुःकतिधाचिदायवेस्वाहा॥
ॐत्वमग्नेप्रथमोतरिश्वनआविर्भवसुक्रतूयाविवस्वते॥अरेजेतांरो

मा

दसी होतृवूर्येसघ्नोर्भारमयजो महो वसो स्वाहा ॥ ॐ त्वमग्ने मनवे द्यामवा
२१ शायः पुरूरवसे सुकृते सुकृत्तरः ॥ श्वात्रेण यत्पित्रोर्मुच्यसे पर्या त्वा पूर्वम
नयन्नापरं पुनः स्वाहा ॥ ॐ त्वमग्ने वृषभः पुष्टिवर्धन उद्यतस्रुचे भव
सि श्रवाय्यः ॥ य आहुतिं परि वेदा वषट्कृतिमेकायुरग्रे विश आविवास
सि स्वाहा ॥ ॐ त्वमग्ने वृजिनवर्तनिं नरं सक्मन्पिपर्षि विदथे विचर्षणे ॥
यःश्शूरसाता परितक्म्ये धने दभ्रेभिश्चित्समृता हंसि भूयसस्वाहा ॥ २१
ॐ त्वं तमग्ने अमृतत्व उत्तमे मर्तं दधासि श्रवसे दिवे ॥ यस्तातृषाण उ दिवे
भयाय जन्मने मयः कृणोषि प्रयआ च सूरये स्वाहा ॥ ॐ त्वं नो अग्ने
सनये धनानां यशसं कारुं कृणुहि स्तवानः ॥ ऋध्याम कर्मापसा नवे

नदेवैर्द्यावापृथिवीप्रावतन्नःस्वाहा॥ॐ त्वंनोअग्नेपित्रोरुपस्थआ
देवोदेवेष्वनवद्यजागृविः॥तनूकृद्बोधिप्रमतिश्चकारवेत्वंकल्याणव
सुविश्वमोपिषेस्वाहा॥त्वमग्नेप्रमतिस्त्वंपितासिनस्त्वंवयस्कृत्तवजा
मयोवयं॥संत्वारायःशतिनःसंसहस्रिणःसुवीरंयंतिव्रतपामदाभ्य
स्वाहा॥ॐ त्वामग्नेप्रथममायुमायवेदेवाअकृण्वन्नहुषस्यविश्पतिं॥
इळामकृण्वन्मनुषस्यशासनींपितुर्यत्पुत्रोममकस्यजायतेस्वाहा॥
ॐ त्वंनोअग्नेतवदेवपायुभिर्मघोनोरक्षतन्वश्चवंद्य॥त्राताताोक
स्यतनयेगवामस्यनिमेषंरक्षमाणस्तवव्रतेस्वाहा॥ॐ त्वमग्नेयज्य
वेपायुरंतरोनिषंगायचतुरक्षइध्यसे॥योरातहव्योवृकायधायसेकी

रेश्विन्मंत्रं मनसा वनोषितं स्वाहा॥ ॐ त्वमग्न उरुशंसाय वाघते स्पा
र्हं यद्रेक्णः परमं वनोषितत्॥ आध्रस्य चित्प्रमतिरुच्यसे पिता प्र पाकं
शास्सि प्रदिशो विदुष्टरः स्वाहा॥ ॐ त्वमग्ने प्रयतदक्षिणं नरं वर्मेव
स्यूतं परिपासि विश्वतः॥ स्वादुक्ष[illegible]द्मा यो वसतौ स्योनकृज्जीवया
जं यजते सोपमा दिवः स्वाहा॥ ॐ इमामग्ने शरणिं मीमृषो न इममध्वा
नं यमगाम दूरात्॥ आपिः पिता प्रमतिः सोम्यानां भृमिरस्यृषिकृन्म
र्त्यानां स्वाहा॥ ॐ मनुष्वदग्ने अंगिरस्वदंगिरो ययातिवत्सदने पूर्व
वच्छुचे॥ अच्छ याह्या वहा दैव्यं जनमासादय बर्हिषि यक्षि च प्रियं स्वा
हा॥ ॐ एतेनाग्ने ब्रह्मणा वावृधस्व शक्ती वा यत्ते चकृमा विदा वा॥ उ

तमग्ने पोष्युभिवस्यो अस्मान्त्सं नः सृज सुमत्या वाजवत्या स्वाहा॥ त्व
मग्ने द्युभिरिति षोडशर्चस्य सूक्तस्य गृत्समदोषिर्जगती॥ आज्यहो
मे विनियोगः॥ ॐ त्वमग्ने द्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्म
नस्परि॥ त्वं वनेभ्यस्त्वमोषधीभ्यस्त्वं नृणां नृपते जायसे शुचिः स्वा
हा॥ ॐ तवाग्ने होत्रं तव पोत्रमृत्वियं तव नेष्ट्रं त्वमग्निदृतायतः॥ तव
प्रशास्त्रं त्वमध्वरीयसि ब्रह्मा चासि गृहपतिश्च नो दमे स्वाहा॥ ॐ त्व
मग्न इंद्रो वृषभः सतामसि त्वं विष्णुरुरुगायो नमस्यः॥ त्वं ब्रह्मा रयि
विद् ब्रह्मणस्पते त्वं विधर्तः सचसे पुरंध्या स्वाहा॥ ॐ त्वमग्ने राजा वरु
णो धृतव्रतस्त्वं मित्रो भवसि दस्म ईड्यः॥ त्वमर्यमा सत्पतिर्यस्य संभु

त्व

जंत्वमंशो विदथे देव भाजयु स्वाहा ॥ ॐ त्वमग्ने त्वष्टा विधते सुवीर्यं त
२२ वग्नावो मित्रमहः सजात्यं ॥ त्वमाशुहेमा ररिषे स्वश्व्यं त्वं नरां शर्धो
असि पुरूवसुः स्वाहा ॥ ॐ त्वमग्ने रुद्रो असुरो महो दिवस्त्वं शर्धो मारु
तं पृक्ष ईशिषे ॥ त्वं वातैररुणैर्यासि शंगयस्त्वं पूषा विधतः पासि नु त्मना
स्वाहा ॥ ॐ त्वमग्ने द्रविणोदा अरंकृते त्वं देवः सविता रत्नधा असि ॥ त्वं
प भगो नृपते वस्व ईशिषे त्वं पायुर्दमे यस्ते विधत्स्वाहा ॥ ॐ त्वामग्ने दम आ २२
विश्पतिं विशस्त्वां राजानं सुविदत्रमृंजते ॥ त्वं विश्वानि स्वनीक पत्यसे
त्वं सहस्राणि शता दश प्रति स्वाहा ॥ ॐ त्वामग्ने पितरमिष्टिभिर्नरस्त्वां
भ्रात्राय शम्या तनूरुचं ॥ त्वं पुत्रो भवसि यस्ते विधत्त्वं सखा सुशेवः पा

स्याधृषः स्वाहा॥ ॐ त्वमग्न ऋभुराके नमस्य१स्त्वं वाजस्य क्षुमतो राय ई
शिषे॥ त्वं वि भास्यनु दक्षि दावने त्वं विशिक्षुरसि यज्ञमातनिः स्वाहा॥
ॐ त्वमग्ने अदितिर्देव दाशुषे त्वं होत्रा भारती वर्धसे गिरा॥ त्वमिळा
शतहिमासि दक्षसे त्वं वृत्रहा वसुपते सरस्वती स्वाहा॥ ॐ त्वमग्ने सुभृ
त उत्तमं वयस्तव स्पार्हे वर्ण आ संदृशि श्रियः॥ त्वं वाजः प्रतरणो बृहन्न
सि त्वं रयिर्बहुलो विश्वतस्पृथु स्वाहा॥ ॐ त्वामग्न आदित्यास आस्यं१
त्वां जिह्वां शुचयश्चक्रिरे कवे॥ त्वां रातिषाचो अध्वरेषु सश्चिरे त्वे
देवा हविरदन्त्याहुतं स्वाहा॥ ॐ त्वे अग्ने विश्वे अमृतासो अद्रुह आसा दे
वा हविरदन्त्याहुतं॥ त्वया मर्तासः स्वदन्त आसुतिं त्वं गर्भो वीरुधां जज्ञि

२४ षेषु त्विः स्वाहा ॥ ॐ त्वं तान्त्सं च प्रति चासि मज्मनाग्ने सुजात प्र च देव रिच्य
से ॥ पृक्षो यदत्र महिना वि ते भुवदनु द्यावापृथिवी रोदसी उभे स्वाहा ॥ ॐ
येस्त्वा त्वभ्या गे॰ अग्ना मरुत्व पत्रा सुमग्रेरानि सृप सृजंति सूर्यः ॥ अस्मान्व
तां॰ श्व महिनि षिवस्यु॰ आबृहद्वदे मविदथे सुवीराः स्वाहा ॥ कद्रुद्रायेति
ब प्वा घोरः कण्वो रुद्रो गायत्री ॥ तृतीया मैत्रावरुणी ॥ आज्यहोमे वि॰
ॐ कद्रुद्राय प्रचेतसे मीढुष्टमाय तव्यसे ॥ वोचेम शंतमं हृदे स्वाहा ॥ २४
रुद्रायेदं न मम ॥ यथा लिंगं त्यागः ॥ ॐ यथा नो॰ अदितिः करत्पश्वे नृभ्यो
यथा गवे ॥ यथा तोकाय रुद्रियं स्वाहा ॥ ॐ यथा नो मित्रो वरुणो यथा रु
द्रश्चिकेतति ॥ यथा विश्वे सजोषसः स्वाहा ॥ ॐ गाथपतिं मेधपतिं रुद्रं ज

लाषभेषजं ॥ तछंयोः सुम्नमीमहे स्वाहा ॥ ॐ यः शुक्रइव सूर्यो हिरण्यमिव
रोचते ॥ श्रेष्ठो देवानां वसु स्वाहा ॥ इमारुद्रायेत्येकादशर्चस्य सूक्तस्य कुत्सो
रुद्रो नव जगत्यंत्ये त्रिष्टुभो ॥ आज्यहोमे विनियोगः ॥ ॐ इमारुद्राय तवसे
कपर्दिने क्षयद्वीराय प्रभरामहे मतीः ॥ यथाशमसद्द्विपदे चतुष्पदे विश्वं
पुष्टं ग्रामे अस्मिन्ननातुरं स्वाहा ॥ ॐ मृळानो रुद्रोत नो मयस्कृधि क्ष
यद्वीराय नमसा विधेम ते ॥ यछंचयोश्च मनुरायेजे पिता तदश्यामतव
रुद्र प्रणीतिषु स्वाहा ॥ ॐ अश्याम ते सुमतिं देवयज्यया क्षयद्वीर
स्य तव रुद्र मीढ्वः ॥ सुम्नायान्निद्विशो अस्माकमाचरारिष्टवीरा जुहवा
म ते हविः स्वाहा ॥ ॐ त्वेषं वयं रुद्रं यज्ञसाधं वंकुं कविमवसे निह्वयामहे ॥

ग०न्न०प०

३५ आरेअस्मदैव्यंहेळोअस्यतुसुमतिमिद्वयमस्यावृणीमहेस्वाहा॥ॐ
दिवोवराहमरुषंकपर्दिनंत्वेषंरूपंनमसानिह्वयामहे।हस्तेबिभ्रद्भेष
जावार्याणिशर्मवर्मछर्दिरस्मभ्यंयंसत्स्वाहा॥ॐइदंपित्रेमरुतामुच्य
तेवचःस्वादोःस्वादोःस्वादीयोरुद्रायवर्धनं॥रास्वाचनोऽअमृतमर्तभोज
नंत्मनेतोकायतनयायमृळस्वाहा॥ॐमानोमहान्तमुतमानोअर्भकंमा
नउक्षन्तमुतमानउक्षितं॥मानोवधीःपितरंमोतमातरंमानःप्रियास्तन्वो
रुद्ररीरिषःस्वाहा॥ॐमानस्तोकेतनयेमानआयौमानोगोषुमानो ३५
अश्वेषुरीरिषः॥वीरान्मानोरुद्रभामितोवधीर्हविष्मन्तःसदमित्त्वाह
वामहेस्वाहा॥ॐउपतेस्तोमान्पशुपाइवाकरंरास्वापितर्मरुतांसुम्ने

मस्मे ॥ भद्राहितेसुमतिर्मृळयत्तमाथावयमवइत्तेवृणीमहेस्वाहा ॥ ॐ आरे
तेगोघ्नमुतपूरुषघ्नंक्षयद्वीरसुम्नमस्मेतेअस्तु ॥ मृळाचनोअधिचब्रू
हिदेवाधाचनःशर्मयच्छद्विबर्हाःस्वाहा ॥ ॐ अवोचामनमोअस्माअ
वस्यवःशृणोतुनोहवंद्रोमरुत्वानू ॥ तन्नोमित्रोवरुणोमामहंतामदि
तिःसिंधुःपृथिवीउतद्यौःस्वाहा ॥ आतेपितर्मरुतामितिपंचदशर्च
स्यसूक्तस्यगृत्समदोरुद्रस्त्रिष्टुप् ॥ आज्यहोमेविनियोगः ॥ ॐ
आतेपितर्मरुतांसुम्नमेतुमानःसूर्यस्यसंदृशोयुयोथाः ॥ ॐ अभिनो
वीरोअर्वतिक्षमेतप्रजायेमहिरुद्रप्रजाभिस्वाहा ॥ ॐ त्वादत्तेभीरु
द्रशंतमेभिःशतंहिमाऽअशीयभेषजेभिः ॥ व्य१द्वेषोवितरंव्यंहोव्य

रु४

स्म

ग०त्र०य०

मीवाश्चातयस्वाविषूचीस्वाहा॥ श्रेष्ठोजातस्यरुद्रश्रियासितवस्तम
३८ स्तवसांवज्रवाहो॥ पर्षिणःपारमंहसःस्वस्तिविश्वाअभीतीरपसो
युयोधिस्वाहा॥ मात्वारुद्रचुक्रुधामानमोभिर्मादुष्टुतीवृषभमासहू
ती॥ उन्नोवीराꣳअर्पयभेषजेभिर्भिषक्तमंत्वाभिषजांशृणोमिस्वा
हा॥ हवीमनिर्हवतेयोहविर्भिरवस्तोमेभीरुद्रंदिषीय॥ ऋदूदरःसु ८
हवोमानोअस्यैबभ्रुःसुशिप्रोरीरधन्मनायैस्वाहा॥ ॐ उन्मामर्मद
वृषभोमरुत्वान्त्वक्षीयसावयसानाधमानं॥ घृणीवछायामरपा ३८
अशीयाविवासेयंरुद्रस्यसुम्नंस्वाहा॥ क्व१स्यतेरुद्रमृळयाकुर्ह
स्तोयोअस्तिभेजोषजलाषः॥ अपभर्तारपसोदैव्यस्याभीनुमावृ

षभ चक्षमीथाः स्वाहा ॥ ॐ प्र बभ्रवे वृषभाय श्वितीचे महो महीं सुष्टु-
तिमीरयामि ॥ नमस्या कल्मलीकिनं नमोभिर्गृणीमसि त्वेषं रुद्रस्य
नाम स्वाहा ॥ ॐ स्थिरेरंगैः पुरुरूप उग्रो बभ्रुः शुक्रेभिः पिपि-
शे हिरण्यैः । ईशानादस्य भुवनस्य भूरेर्न वा उ योषद्रुद्रादसुर्य-
१ स्वाहा ॥ ॐ अर्हन्विभर्षि सायकानि धन्वार्हन्निष्कं यजनं वि-
श्वरूपं ॥ अर्हन्निदं दयसे विश्वमभ्वं न वा ओजीयो रुद्र त्वद-
स्ति स्वाहा ॥ ॐ स्तुहि श्रुतं गर्तसदं युवानं मृगं न भीममुपहत्नुमुग्रं ॥ मृळा
जरित्रे रुद्र स्तवानोन्यं ते अस्मन्निवपंतु सेनास्वाहा ॥ ॐ कुमारश्चित्पित-
रं वंदमानं प्रतिनानाम रुद्रोपयंतं ॥ भूरेर्दातारं सत्पतिं गृणीषे स्तुतस्त्वं भेष-

३८ जारीस्य स्मे स्वाहा ॥ ॐ या वो भेषजा मरुतः शुचीनि या शंतमा वृषणो या मयो
भु ॥ यानि मनुरवृणीता पिता नस्ता शं च योश्च रुद्रस्य वश्मि स्वाहा ॥ ॐ परिणो
हेती रुद्रस्य वृज्याः परित्वेषस्य दुर्मतिर्मही गात् ॥ अव स्थिरा मघवद्भ्यस्तनुष्व
मीढ्वस्तोकाय तनयाय मृळ स्वाहा ॥ ॐ एवा बभ्रो वृषभ चेकितान यथा दे
व न हृणीषे न हंसि ॥ हवनश्रुन्नो रुद्रेह बोधि बृहद्वदेम विदथे सुवीराः स्वाहा
॥ एतैरेकोनाशीतिमंत्रैः प्रतिमंत्रं स्वाहांतैराज्यं हुत्वा घंटादिवादित्रनादै ३७
र्वैद्यामाराधितैकचत्वारिंशद्देवताभ्ये वरुणाय च धूपदीपनैवेद्यतांबू
लादीन्समर्प्य प्रसीदंतु भवंत इति तान्संप्रार्थ्य कृत्विगन्वारब्धश्च रुति
लव्रीहिद्रोषेण स्विष्टकृतं हुत्वा इध्मसंनहनमग्नौ प्रास्य प्रायश्चित्तादि

होमशेषं समाप्य यजमानान्वारब्ध आचार्यः पूर्णाहुतिं स्थालीपाके वक्ष्य
माणप्रकारेण हुत्वा विश्वेभ्यो देवेभ्यः संस्रावं हुत्वा पूर्णपात्रनिनयनोपस्था
नपरिस्तरणविसर्जनपरिसमूहनपर्युक्षणाग्न्यर्चनपात्रोत्सर्जनादि कुर्यात्॥
अथ मंडपैशान्ये पंचरंगैः स्वस्तिकं कृत्वा चतुष्पादं दीर्घचतुरस्रं सोत्तरछदं तत्र
न्स त्र पीठं निधाय तत्रोदगग्राँ मूलान्हरितदर्भानास्तीर्य तत्र सामास्यं यजमानं प्रा
ङ्मुखमुपवेश्याचार्यर्त्विग्भिः सह मंगलवाद्यैरभिषेककुंभोदकं पात्रांतर आ
दाय प्रत्यङ्मुखस्तिष्ठन्सपत्नीकायोदुंबर्यार्द्रशाखया सहिरण्यपवित्रया
सकुशादूर्वापल्लवया हस्तमंतर्धायोदकपृषद्भिरब्लिंगाभिर्वारुणीभिर्या
वमानीभिरन्याभिश्च शांतिपवित्रलिंगाभिर्महाभिषेकमंत्रैः सुरास्त्वामभि

तिसूक्तेनेमाआपःशिवनमाइतित्र्यृचेनदेवस्यत्वेतियजुषाभूर्भुवःस्वरि
त्तिचव्याहृतिभिरभिषिंचेत्॥ तेचमंत्राः॥ आपोहिष्ठेतिनवर्चस्यसूक्त
स्यांबरीषःसिंधुद्वीपआपोगायत्रीपंचमीवर्धमानासप्तमीप्रतिष्ठाअंत्ये
द्वेअनुष्टुभौ॥ अभिषेकेविनियोगः॥ ॐ आपोहिष्ठामयोभुवः० ऋचः ९
प्रसम्राजइत्यष्टर्चस्यसूक्तस्यात्रिर्वरुणस्त्रिष्टुप्॥ अभिषेकेवि० ॐ
प्रसम्राजेबृहदर्चागभीरंब्रह्मप्रियंवरुणायश्रुताय॥ वियोजघानं
शमितेवचर्मोपस्तिरेपृथिवींसूर्याय॥ वनेषुव्यंतरिक्षंततानवाजम
र्वत्सुपयउस्रियासु॥ हृत्सुक्रतुंवरुणोअप्स्वग्निंदिविसूर्यमदधात्सो
ममद्रौ॥ नीचीनवारंवरुणःकवंधंप्रससर्जरोदसीअंतरिक्षं॥ तेनविश्व

स्यभुवनस्यराजायवंनवृष्टिर्व्युनत्तिभूम॥उनत्तिभूमिंपृथिवीमुतद्यां
यदादुग्धंवरुणोवष्ट्यादित्॥समभ्रेणवसतपर्वतासस्तविषीयंतःश्रथ
यंतवीराः॥इमामूष्वासुरस्यश्रुतस्यमहींमायांवरुणस्यप्रवोचं॥माने
नेवतस्थिवाँअंतरिक्षेवियोममेपृथिवींसूर्येण॥१॥इमामूनुकवि
तमस्यमायांमहींदेवस्यनकिरादधर्ष॥एकंयदुद्नानपृणंत्येनीरासिं
चंतीरवनयःसमुद्रं॥अर्यम्यंवरुणमित्र्यंवासखायंवासदमिद्भ्रा
तरंवा॥वेशंवानित्यंवरुणारणंवायत्सीमागश्चकृमाशिश्रथस्तत्॥कि
घा
तवासोयद्रिरिपुर्नदीवियद्वाघासत्यमुतयन्नविद्म॥सर्वाताविष्यशिथि
रेवदेवाधातेस्यामवरुणप्रियासः॥२॥स्वादिष्टयेतिदशर्चस्यसूक्तस्य

३८ मधुछंदाः पवमानसोमो गायत्री ॥ अभिषेके वि० ॐ स्वादिष्ठया मदिष्ठया०
ऋचः १० शंन इंद्राग्नीति पंचदशर्चस्य सूक्तस्य वसिष्ठो विश्वे देवास्त्रिष्टु
प् ॥ अभिषेके वि० ॐ शंन इंद्राग्नी भवतामवोभिः शंन इंद्रावरुणा रात
हव्या ॥ शमिंद्रासोमा सुविताय शंयोः शंन इंद्रापूषणा वाजसातौ ॥ शंनो ष
भगः शमु नः शंसो अस्तु शंनः पुरंधिः शमु संतु रायः ॥ शंनः सत्यस्य सुप
मस्य शंसः शंनो अर्यमा पुरुजातो अस्तु ॥ शंनो धाता शमु धर्ता नो अस्तु
शंन उरूची भवतु स्वधाभिः ॥ शंरोदसी बृहती शंनो अद्रिः शंनो दे ३८
वानां सुहवानि संतु ॥ शंनो अग्निर्ज्योतिरनीको अस्तु शंनो मित्रावरु
णावश्विना शं ॥ शंनः सुकृतां सुकृतानि संतु शंन इषिरो अभि वातु वा

नः॥ शंनोद्यावापृथिवीपूर्वहूतौशमंतरिक्षंदृशयेनोअस्तु॥ शंन
ओषधीर्वनिनोभवंतुशंनोरजसस्पतिरस्तुजिष्णुः॥५॥ शंनइंद्रोवसुभि
र्देवोअस्तुशमादित्येभिर्वरुणःसुशंसः॥ शंनोरुद्रोरुद्रेभिर्जलाषः शंन
स्त्वष्टाग्नाभिरिहशृणोतु॥ शंनःसोमोभवतुब्रह्मशंनःशंनोग्रावा
णःशमुसंतुयज्ञाः॥ शंनःस्वरूणांमितयोभवंतुशंनःप्रस्वः१शम्व
स्तुवेदिः॥ शंनःसूर्यउरुचक्षाउदेतुशंनश्चतस्रःप्रदिशोभवंतु॥
शंनःपर्वताध्रुवयोभवंतुशंनःसिंधवःशमुसंत्वापः॥ शंनोअदिति
र्भवतुव्रतेभिःशंनोभवंतुमरुतःस्वर्काः॥ शंनोविष्णुःशमुपूषानोअस्तु
शंनोभवित्रंशम्वस्तुवायुः॥ शंनोदेवःसवितात्रायमाणःशंनोभवंतूष

सो विभातीः ॥ शं नः पर्जन्यो भवतु प्रजाभ्यः शं नः क्षेत्रस्य पतिरस्तु शंभुः ॥२॥
शं नो देवा विश्वदेवा भवंतु शं सरस्वती सह धीभिरस्तु ॥ शमभिषाचः श
मु रातिषाचः शं नो दिव्याः पार्थिवाः शं नो अप्याः ॥ शं नः सत्यस्य पतयो भवंतु शं
नो अर्वंतः शमु संतु गावः ॥ शं न ऋभवः सुकृतः सुहस्ताः शं नो भवंतु पितरो ह
वेषु ॥ शं नो अज एकपाद्देवो अस्तु शं नोहिर्बुध्न्यः शं समुद्रः ॥ शं नो अपा
नपासेहरस्तु शं नः पृश्निर्भवतु देवगोपा ॥ आदित्या रुद्रा वसवो जुषंतेदं ब्र
ह्म क्रियमाणं नवीयः ॥ शृण्वंतु नो दिव्याः पार्थिवासो गोजाता उत ये यज्ञिया
सः ॥ ये देवानां यज्ञिया यज्ञियानां मनोर्यजत्रा अमृता ऋतज्ञाः ॥ ते नो रासंता
मुरुगायमद्य यूयं पात स्वस्तिभिः सदा नः ॥३॥ पवित्रं ते विततमिति पंचर्चं

स्यवर्गस्यांगिरसः पवित्रः सोमो जगती ॥ अभिषेके वि० ॐ पवित्रं ते विततं ब्र
ह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः ॥ अतप्ततनूर्न तदामो अश्नुते शृतास इद्
वहंतस्तत्समाशत ॥ तपोष्पवित्रं विततं दिवस्पदे शोचंतो अस्य तंतवो व्यस्थि
रन् ॥ अवंत्यस्य पवीतारमाशवो दिवस्पृष्ठमधितिष्ठंति चेतसा ॥ अरूरुचदु
षसः पृश्निरग्रिय उक्षा बिभर्ति भुवनानि वाजयुः ॥ मायाविनो ममिरे अस्य
मायया नृचक्षसः पितरो गर्भमादधुः ॥ गंधर्व इत्था पदमस्य रक्षति पाति
देवानां जनिमान्यद्भुतः ॥ गृभ्णाति रिपुं निधया निधापतिः सुकृत्तमा म
धुनो भक्षमाशत ॥ हविर्हविष्मो महि सद्म दैव्यं नभो वसानः परियास्यध्व
रं ॥ राजा पवित्ररथो वाजमारुहः सहस्रभृष्टिर्जयसि श्रवो बृहत् ॥१॥ अथ

४१ ग्रहमंत्राः॥ ग्रहाणामादिरादित्यो लोकरक्षणकारकः॥ विषमस्थानसंभूतां पी
डां दहतु ने रविः॥१॥ रोहिणीशः सुधामूर्तिः सुधागात्रः सुधाशनः॥ विषमस्था
नसंभूतां पीडां दहतु ने विधुः॥२॥ भूमिपुत्रो महातेजा जगतां भयकृत्सदा॥ वृष्टि
कृद्वृष्टिहर्ता च पीडां दहतु ने कुजः॥३॥ उत्पातरूपो जगतां चंद्रपुत्रो महाद्यु
तिः॥ सूर्यप्रीतिकरो विद्वान्पीडां दहतु ने बुधः॥४॥ देवमंत्री विशाला
क्षः सदा लोकहिते रतः॥ अनेकशिष्येः संपूर्णः पीडां दहतु ने गुरुः॥ ४१
ह ॥५॥ दैत्यमंत्री गुरुस्तेषां प्राणदश्च महामतिः॥ प्रभुस्ताराग्रहाणांच पी
डां दहतु ने भृगुः॥६॥ सूर्यपुत्रो दीर्घदेहो विशालाक्षः शिवप्रियः॥ मं
दचारः प्रसन्नात्मा पीडां दहतु ने शनिः॥७॥ महाशिरो महावक्त्रो दीर्घ

दंष्ट्रो महाबलः॥ अनन्तश्चोर्ध्वकेशाश्च पीडां दहंतु ते नमः॥८॥ अनेकरूप
वर्णैश्च नानानेत्रोथ सहस्रशः॥ उत्पातरूपो जगतां पीडां दहंतु ते शिखी॥
॥९॥ अथ देवमंत्राः॥ सुरास्त्वामभिषिंचंतु ब्रह्मविष्णुमहेश्वराः॥ वासु
स्तथा देवो जगन्नाथो संकर्षणो विभुः॥ प्रद्युम्नश्चानिरुद्धश्च भवंतु विजया
यते॥ आखंडलोग्निर्भगवान्यमो वै निर्ऋतिस्तथा॥ वरुणः पवनश्चैव
धनाध्यक्षस्तथा शिवः॥ ब्रह्मणासहिताः सर्वे दिक्पालाः पांतु ते सदा॥
कीर्त्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिश्रद्धा क्रिया मतिः॥ बुद्धिर्लज्जा वपुः
शांतिः कांतिः पुष्टिश्च मातरः॥ एतास्त्वामभिषिंचंतु देवपत्न्यः समाग
ताः॥ आदित्यश्चंद्रमा भौमो बुधजीवसितार्कजाः॥ ग्रहास्त्वामभिषिं

चंतुराहुकेतुश्च पूजिताः॥ देवदानवगंधर्वायक्षराक्षसपन्नगाः॥ ऋषयोमु
४२ नयोगावो देवमातर एव च॥ देवपत्न्यो द्रुमानागा दैत्याश्चाप्सरसांगणाः॥
अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च॥ औषधानि च रत्नानि का
लस्यावयवाश्च ये॥ सरितः सागराः शैलास्तीर्थानि जलदानदाः॥ एतेत्वा
मभिषिंचंतु सर्वकामार्थसिध्दये॥ एतैर्मंत्रैः प्रतिमंत्रमभिषिच्य॥ हिरण्य
वर्णामिति पंचदशर्चस्य सूक्तस्यानंदकर्दमचिक्लीतेंदिरासुताऋषयः॥
श्रीर्देवता॥ आद्यास्तिस्रोनुष्टुभः॥ चतुर्थी प्रस्तारपंक्तिः॥ पचमीषष्ठ्यौ त्रि ४२
ष्टुभौ॥ ततोष्टावनुष्टुभः॥ अंत्या प्रस्तारपंक्तिः॥ अभिषेके वि॰ ॐ हिरण्य
वर्णां हरिणीं सुवर्णरजतस्रजां॥ चंद्रां हिरण्मयीं लक्ष्मीं जातवेदोममा

वह ॥ तां म आवह जातवेदो लक्ष्मीमनपगामिनीं ॥ यस्यांहिरण्यं विंदे
यंगामश्वंपुरुषानुहं ॥ अश्वपूर्वांरथमध्यांहस्तिनादप्रमोदिनीं ॥
श्रियंदेवीमुपह्वये श्रीर्मादेवीर्जुषतां ॥ कांसोस्मितांहिरण्यप्राकारामा
र्द्रीं ज्वलंतींतृप्तांतर्पयंतीं ॥ पद्मेस्थितांपद्मवर्णांतामिहोपह्वये
श्रियं ॥ चंद्रांप्रभासांयशसाज्वलंतीं श्रियंलोकेदेवजुष्टामुदारां ॥ तांपद्म
नेमिंशरणमहंप्रपद्येअलक्ष्मीर्मेनश्यतांत्वांवृणोमि ॥१॥ आदित्यवर्णेत
पसोधिजातोवनस्पतिस्तववृक्षोथबिल्वः ॥ तस्यफलानितपसानुदंतु
मायांतरायाश्चबाह्याअलक्ष्मीः ॥ उपैतुमांदेवसखः कीर्तिश्चमणिना
सह ॥ प्रादुर्भूतोस्मिराष्ट्रेस्मिन्कीर्तिंवृद्धिंददातुमे ॥ क्षुत्पिपासामला

४३ ज्येष्ठाअलक्ष्मीर्नाशयाम्यहं ॥ अभूतिमसमृद्धिंचसर्वान्निर्णुद मे गृ
हात् ॥ गंधद्वारांदुराधर्षां नित्यपुष्टांकरीषिणीं ॥ ईश्वरीं सर्वभूतानां ता
मिहोपह्वये श्रियं ॥ मनसःकाममाकूतिं वाचः सत्यमशीमहि ॥ पशूनां
रूपमन्नस्य मयि श्रीःश्रयतां यशः ॥२॥ कर्दमेन प्रजाभूता मयि संभव
म कर्दम ॥ श्रियं वासय मे कुले मातरं पद्ममालिनीं ॥ आपःसृजंतु स्नि ४३
ग्धानि चिक्लीत वस मे गृहे ॥ नि च देवीं मातरं श्रियं वासय मे कुले ॥
आर्द्रां पुष्करिणीं पुष्टिं सुवर्णां हेममालिनीं ॥ सूर्यां हिरण्मयीं लक्ष्मीं
जातवेदो ममावह ॥ आर्द्रां यःकरिणीं यष्टिं पिंगलां पद्ममालिनीं ॥
चंद्रां हिरण्मयीं लक्ष्मीं जातवेदो ममावह ॥ तां म आवह जातवे

दोलक्ष्मीमनपगामिनीं॥यस्यांहिरण्यंप्रभूतिंगावोदास्योऽश्वान्विं
देयंपुरुषानहं॥यःशुचिःप्रयतोभूत्वाजुहुयादाज्यमन्वहं॥श्रियःपं
चदशर्चंचश्रीकामःसततंजपेत्॥ॐइमाआपःशिवतमाइमाःसर्व
स्यभेषजीः॥इमाराष्ट्रस्यवर्धनीरिमाराष्ट्रभृतोमृताः॥याभिरिंद्रम
भ्यषिंचत्प्रजापतिःसोमंराजानंवरुणंयमंमनुं॥ताभिरद्भिरभिषिंचामि
त्वामहंराष्ट्राणांत्वमधिराजोभवेह॥महांतंत्वामहीनांसम्राजंचर्षणीनांदे
द्रा वीजनित्र्यजीजनभद्रंजनित्र्यजीजनत्॥देवस्यत्वासवितुःप्रसवे॥अश्वि
नोर्बाहुभ्यां॥पूष्णोहस्ताभ्यां॥अश्विनोर्भैषज्येन॥तेजसेब्रह्मवर्चसाया
भिषिंचामि॥देवस्यत्वासवितुःप्रसवे॥अश्विनोर्बाहुभ्यां॥पूष्णोहस्ता

ग्र.य. भ्यां ॥ सरस्वत्यै भैषज्येन ॥ वीर्यायान्नाद्यायाभिषिंचामि ॥ देवस्य त्वा सवितुः
८४ प्रसवे ॥ अश्विनोर्बाहुभ्यां ॥ पूष्णो हस्ताभ्यां ॥ इंद्रस्येंद्रियेण ॥ श्रियै यशसे
बलायाभिषिंचामि ॥ देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्या
ं सरस्वत्यै वाचो यंतुर्यंत्रेणाग्नेस्त्वा साम्राज्येनाभिषिंचामींद्रस्य बृहस्पते
स्त्वा साम्राज्येनाभिषिंचामि ॥ भूर्भुवस्वः अमृताभिषेकोस्तु शांतिः पुष्टिस्तु
ष्टिश्चास्तु ॥ एवमभिषिक्तो यजमानः श्वेताहतवस्त्रयुगं गंधमाल्याभर
णं च बिभृयात् ॥ ततआचार्यो दिक्षु विदिक्षु च बलिमुत्क्षिप्य सुवा ८४
सिनीभिर्नीराजनं कारयेत् ॥ अथ यजमानो ग्रहदेवताभ्यश्चतुर्थ्यंतदेव
तानामभिः पुष्पाणि समर्प्याचार्येण व्याहृत्युच्चारणपूर्वकं ग्रहोद्वासनं

कारयित्वाऽऽचार्यब्रह्म[illegible]भ्योजपहोमफलंगृहीत्वातेभ्योदक्षिणांदद्यात्
॥गौः॥शंखः॥रक्तोनड्वान्॥हिरण्यंपीतंवासः॥श्वेताश्वः॥कृष्णागौः॥
कालायसं॥हस्तीछागोवेति॥ग्रहक्रमेण॥अत्रन्यूनदक्षिणाबुधद
क्षिणाहिरण्येनसमाकार्याआद्यगवाच॥एतदभावेसर्वेभ्योयथाशक्ति
हिरण्यंवादद्यात्॥आचार्यायद्विगुणं॥अन्येभ्यश्चयथाशक्तिभू
यसीं॥ततःकांस्यपात्रगताज्येरूपंरूपंप्रतिरूपोबभूवेतिमंत्रेणस
कुटुंबस्यप्रतिरूपंप्रेक्ष्य॥आज्यंतेजःमुद्दिष्टमाज्यंपापहरंस्मृतं॥ स
आज्यंसुराणामाहारआज्येदेवाःप्रतिष्ठिताइतिमंत्रंपठित्वातदा
ज्यंसदक्षिणंब्राह्मणायदद्यात्॥ततोभूरिदक्षिणांदत्वासंकल्प्यचा॥

एकस्या आहुतेरेकं शतस्यैकं सहस्रस्य वा यथाशक्ति ब्राह्मणान्भोज
यित्वा तेभ्यः शान्तिः पुष्टिस्तुष्टिश्चास्त्वित्याद्याशिषो गृहीत्वा तान्संप्रार्थ्य
प्रणिपत्य यस्य स्मृत्या च नामोक्त्या०तमच्युतमिति पठित्वा॥ प्रमादात्कु
र्वतां कर्म प्रच्यवेताध्वरेषु यत्॥ स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति
श्रुतिरित्युक्त्वा॥ न्यूनातिरिक्ताच्छिद्रत्वार्थं यथाशक्ति अच्युतानंत
गोविंदेति नामन्त्रजपं कृत्वा ग्रहयज्ञफलं श्रीविष्णवे समर्प्य स्वयं
हृष्टमना बंधुभिः सह भुंजीत॥ अयं चाश्वलायनगृह्यपरिशिष्टोक्तो
ग्रहमखः आश्वलायनानामेव॥ बह्वृसंवास्व[illegible]स्योक्तं यस्य कर्म प्र
चोदितं॥ तस्य तावति शास्त्रार्थे कृते सर्वः कृतो भवेदिति वचनाँ एवम
तु॥

न्येषामपि यदि स्वगृहस्याद्दावुक्तः तदा स एव ॥ येषां तु गृहस्यादौ नोक्तस्तैर्या
ज्ञवल्क्यादिस्मृत्युक्तः मत्स्यपुराणाद्युक्तो वानुष्ठेयः स्मृत्यादेः साधार
ण्यादिति दिक् ॥ ॥ इती श्रीविद्वन्मुकुटमाणिक्य श्रीरामेश्वरभट्टसू
रिसूनुनारायणभट्टकृते प्रयोगरत्ने नवग्रहमखप्रयोगः ॥ ७ ॥
शके १७८४ दुंदुभिनामाब्दे चैत्र कृष्णद्वादश्यां भृगौ इदं पुस्तकं स
माप्तं ॥ ॥ इदं पुस्तकं हेजीबइरूपनामक केशवसूनुनाग
णेशेन लिखितं ॥ ॥ स्वार्थं परार्थं च ॥ ॥ ग्रंथसंख्या

ग्र० प० स०
५७

। इतिगद्यपरिनिष्ठोक्तग्रहमखसमाप्तः ॥

```
[OrderDescription]
,CREATED=17.08.20 16:17
,TRANSFERRED=2020/08/17 at 16:30:55
,PAGES=93
,TYPE=STD
,NAME=S0003506
,Book Name=M-3066-GRIHPARI SHISHTOKAT
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
```

```
FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
```

```
FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
```

```
FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
```

```
FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
```

```
FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
```

```
FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,
```